ISSN- 2320- 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृतदर्शनविभागस्य peer-reviewed शोधपत्रिका)

## सप्तमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

स्वामी जपसिद्धानन्दः

सम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit & Philosophy)
ISSN– 2320–5911

**सम्पादकः -** डॉ. राकेशदाशः
**सम्पादकमण्डली -** डॉ. वेङ्कटरमणभट्टः, डॉ. गोपीकृष्णन् रघुः, डॉ. नागराजभट्टः, डॉ. नीरजकुमारभार्गवः, स्वामी वेदार्थानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः

**Editor:** Dr. Rakesh Das
**Board of Editors:** Dr. Venkataramana Bhat, Dr. Gopikrishnan Reghu, Dr. Nagaraja Bhat, Dr. Neeraj Kumar Bhargave, Swami Vedarthananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat

**प्रकाशकः -** कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher:** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail: prajnaloka.rkmvu@gmail.com

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०१९
Year of Publishing– 2019

मूल्यम्– ₹ ७०/–
Price– ₹ 70/-

Powered by LaTeX 2ε

Printer : Rama Art Press, 6/30, Dum Dum Road, Kolkata 30

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | i |
| २. | Foreword<br>Swami Atmapriyananda | iii |
| ३. | तत्त्वमसिवाक्यार्थविचारे पूर्वाचार्यसरणिं प्रति कश्चित् पूर्वपक्षः<br>स्वामी वेदार्थानन्दः | 1 |
| ४. | "अन्यदेव तद्विदितादथो अविदितादधि" : केनोपनिषन्मन्त्रस्यास्य द्वैताद्वैतविशिष्टाद्वैतभाष्यमाश्रित्य अध्ययनम्<br>पलाशघोडइः | 21 |
| ५. | उपसर्गार्थचन्द्रिकानुसारं प्रपूर्वक-सत्तार्थक-भू धातोः प्रयोगविमर्शः<br>नित्यानन्दमान्ना | 33 |
| ६. | रघुवंशमहाकाव्ये इद्राादिदेवकृतविष्णुस्तुतौ अद्वैतचिन्तनम्<br>सुजितपरामानिकः | 41 |
| ७. | अध्ययनाध्यापनविषये श्रौतस्मार्तचिन्तनम्<br>प्रशान्तदे | 54 |
| ८. | अर्वाचीनसंस्कृतसाहित्ये आचार्यस्य सीतानाथशास्त्रिणोऽवदानम्<br>सोमा प्रामाणिका | 61 |
| ९. | भामहाचार्यस्य स्वकीयकृतौ शब्दालङ्कारनिरूपणम्<br>सञ्जयभट्टाचार्यः | 65 |
| १०. | Marriage and Its Death : A Brief lnsight Based on *Smṛti* literature<br>Bhaktilata Das | 69 |

११. *VEṢṬANAVYĀYOGAḤ* : A CRITICAL STUDY 81
Sushree Chakraborty

# निवेदनम्

प्रज्ञालोकाख्याया विबुधमुदातानिकायाः पत्रिकाया इयं दशमी सञ्चिका। पूर्ववत् लेखानां चयने विशेषज्ञानां मतम् एव अङ्गीकृतम्। प्राबन्धिकानां परिचयम् अज्ञातवन्तः समीक्षकाः प्रबन्धानां समीक्षाम् अकुर्वन्। तेषां समीक्षकाणां कृते कार्तज्ञ्यं प्रकटयामः।

अस्मिन् अङ्के नव प्रबन्धाः वरीवृत्यन्ते। अद्वैतरीत्या तत्त्वमसि इति उदेशवाक्यस्य अर्थविचारप्रसङ्गे पूर्वाचार्याः कीदृशान् पूर्वपक्षान् समुपास्थापयन् इति विषयः सम्यग् विचारितः स्वामिवेदार्थानन्दमहाराजेन। पलाशघोडइ-वर्येण केनोपनिषदः मन्त्रविशेषस्य विविधप्रस्थानदृशा तौलनिकम् आलोचनम् उपस्थापितम्। नित्यानन्दमान्ना-महोदयः प्र-पूर्वकस्य सत्तार्थकस्य भू-धातोः अर्थान् विविधप्रयोगानुरोधेन न्यरूपयन्। रघुवंशमहाकाव्ये इन्द्रादिदेवैः भगवतः विष्णोः स्तुतिः या विहिता तत्र अद्वैततत्त्वस्य प्रतिभानं कथम् इति विचारितवान् सुजितपरामानिक-महोदयः। अध्ययनस्य अध्यापनस्य च pedagogy-शब्दवाच्यस्य श्रुतौ स्मृतौ च कीदृशं चिन्तनं कृतं तत् दे-इत्युपाह्वेन प्रशान्तमहोदयेन विचारितम्। प्रामाणिकोपह्वया सोमामहोदयया शास्त्रिसीतानाथस्य साहित्याकृतीनां विवरणं कृतवती समीक्षकदृष्ट्या। भामहाचार्यम् अनुसृत्य शब्दालङ्काराणां निरूपणं कृतवान् सञ्जयभट्टाचार्यः। अस्मिन् अङ्के द्वौ बन्धौ आङ्गलेयभाषोपनिबद्धौ वर्तेते। एकः प्राचीनार्वाचीनधर्मशास्त्रेषु दम्पत्योः घटच्छेदविषयकः दासोपह्वया भक्तिलतया विरचितः। अपरः वेष्टनव्यायोग-नामधेयस्य साम्प्रतिककाले विरचितस्य व्यायोगस्य समीक्षणरूपः चक्रवर्तीत्युपाह्वया सुश्रिया विरचितः। निबन्धकारेभ्यः अभिनन्दनानि कार्तज्ञ्यं च विज्ञापयामः।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयप्रतिकुलाधिपतिभ्यः, पूज्यकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे। भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA EDUCATIONAL AND RESEARCH INSTITUTE
(Formerly known and Ramakrishna Mission Vivekananda University)
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being)! Reach me through and through! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace!

The present issue of our Research Journal *Prajñāloka* of the Department of Sanskrit and Philosophy, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published. This journal, as mentioned in my Foreword to an earlier issue, is a reverential attempt to worship surabharati by our faculty

of the Department of Sanskrit and Philosophy. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of

Swami Atmapriyananda
Vice-Chancellor

Belur Math
4 July 2019

# तत्त्वमसिवाक्यार्थविचारे पूर्वाचार्यसरणिं प्रति कश्चित् पूर्वपक्षः *

**स्वामी वेदार्थानन्दः †**

## ०. पूर्वपीठिका

औपनिषदं ब्रह्मविज्ञानं ह्यमृतत्वसाधनम्। तच्चौपनिषदं ब्रह्म निखिलोपाधिप्रतिषेधक-नेतिनेतीतिपर्यन्तैः वाक्यैः निर्दिष्टं सच्चिदानन्दस्वरूपं तत्त्वम्। तदात्मेत्येव बोद्धव्यम्, न त्वन्यथा, अन्यथा बोधेन परमपुरुषार्थप्रयोजनासिद्धेः। अन्यथा बोद्धुमशक्यञ्च ब्रह्म, आत्मभिन्नस्यैवोपाधित्वाद् उपाधीनाञ्च प्रतिषिद्धत्वाद् आत्मनश्च प्रतिषेद्धुमशक्यत्वात्। 'अन्यदेव तद्विदितादथो अविदितादधि'[१] इत्यनुशासनवाक्यं स्पष्टीकुर्वद्भिरत एव भाष्यकारभगवत्पूज्यपादैः 'न ह्यन्यस्य स्वात्मनो विदिताविदिताभ्यामन्यत्वं वस्तुनः सम्भवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः'[२] इति दर्शितम्। अत एव वेदान्ताचार्याः जीवब्रह्मैक्यम् उपनिषदां विषयं वदन्ति। तस्मात् श्रुतितात्पर्यं सर्वथा आत्मब्रह्मैक्यमथवा आत्माद्वैतमेवेति स्पष्टम्। वेदान्तानां विषयभूतमिदमात्मैक्यं निर्दिशन्तो देशिकाः 'तत्त्वमसि'[३] इति छान्दोग्यश्रुतिम् भूयो भूयः समुद्धरन्ति। मुमुक्षं श्रोतारम् प्रति कृतस्य श्रोत्रियोपदेशस्य सारभूतं विराजते 'तत्त्वमसि' इति सामवेदीयं वाक्यम्। अत एव प्रायः सर्वेष्वपि प्रकरणग्रन्थेषु वादग्रन्थेषु च वेदान्तानां विषयः क इति विचारे प्रवृत्ते इदम् एव वाक्यम् उद्धृत्य विचारितम्।

उपदेशसाहस्रीप्रभृतिग्रन्थे स्पष्टम् प्रतिपादितं तत्त्वमसि इति वाक्यस्या-खण्डार्थबोधकत्वं वार्तिककारभगवत्पादाः नैष्कर्म्यसिद्धावङ्गीकुर्वन्ति[४]।

सम्पूर्णस्य वाक्यस्य अखण्डार्थे तात्पर्ये दर्शिते सति वाक्यादखण्डार्थबोध

---

* २०१५ तमवर्षे अगस्तमासस्य १८ तमदिनाङ्के रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयेन समायोजितायां वेदान्तसङ्गोष्ठ्याम् पठितो निबन्धः

† सहायकाध्यापकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

१ केनोपनिषत् १.४

२ श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ४४

३ छान्दोग्योपनिषत् ६.८.७

४ नैष्कर्म्यसिद्धेः तृतीयाध्यायो द्रष्टव्यः। तत्र यथा 'अनालिङ्गितसामान्यौ न जिहासितवादिनौ। व्युत्थितौ तत्त्वमौ तस्मादन्योन्याभिसमीक्षणौ॥' इति। अस्यार्थः– अनालिङ्गिते

एव श्रुतिसम्मतोऽवगम्येत, न तु कदापि क्रियार्थं कापि चोदना। एवञ्च प्रसङ्ख्यानवादो निरस्तः स्यादित्याचार्याः मन्यन्ते। अनेनोद्देशेन वार्तिककारादिभिराचार्यैः शाब्दबोधनयान् समाश्रित्य तत्त्वमसिवाक्यार्थविचारः प्रदर्शितः। तत्त्वमसिवाक्यं कथङ्कारम् आत्माद्वैतम् बोधयतीति चिन्तायाम् पूर्वाचार्यैरेवं स्वग्रन्थेषु वाक्यार्थविचारकाले भागत्यागलक्षणामुखेन दर्शिता प्रसिद्धेयं पद्धतिः वेदान्तप्रकरणेषु[५] तत्र तत्रोद्ध्रियते। वेदान्तपरिभाषाकारेण इयमेव सरणिर्लक्षणाङ्गीकारं विना दर्शिता।[६] श्रीसुरेश्वरभगवत्पूज्यपादैस्तु भागत्यागलक्षणायाः स्थाने जहल्लक्षणा वा गौणीवृत्तिर्वा स्वीक्रियते।[७]

या कापि वा भवतु लक्षणा, प्रक्रियाया अस्याः व्याख्यातारः श्रुतिविवक्षिताभेदान्वयसिद्धिः इत्येतत्प्रयोजनमाश्रित्यैव तत्त्वम्पदयो-रुभयोरपि समानरूपां लक्षणां वदन्ति।[८] एवं वादेऽखण्डार्थस्तु वाक्यात् सिद्ध्यति, परन्त्वनुपपत्तयः काश्चन अनुगन्तृभिरपि सम्भाव्येरन्। तथा सम्भाव्यमाना अनुपपत्तयः, तासां निवारणाय भाष्यादिकमवलम्ब्य कल्प्यमाना अपरा काचिद् वाक्यार्थविचारसरणिश्च उपदेशसाहस्रीनैष्कर्म्यसिद्ध्यादिग्रन्थेषु दृष्टां सरणिम् प्रति कश्चित् पूर्वपक्षः सम्पद्यते। स चात्र वितन्यते।

## १. पूर्वाचार्याणाम् प्रक्रियाया उक्तव्याख्यानेऽनुपपत्तयः

### १.१. श्रुतिविरोधः

तत्पदेन सर्वज्ञत्वसर्वेश्वरत्वादिविशिष्टचैतन्यम् प्रथममवगम्यते, ततश्च तस्य त्वम्पदवाच्यार्थेन सह श्रुत्यभिमताभेदान्वयस्य अन्यथानुपपत्तिमाश्रित्य लक्षणया तदुपाधिरहितं चैतन्यमवगम्यत इत्येवं व्याख्यानमयुक्तम्, तत्पदेन श्रुत्या पूर्वमध्यारोपापवादाभ्याम् बोधितं निरुपाधिकं सद्ब्रह्म एव निर्दिष्टमित्यतः पुनस्तदर्थसिद्ध्यै लक्षणाङ्गीकारस्य वैयर्थ्यात्। तस्मात् ‘एवञ्च

परित्यक्तेऽविवक्षिते सामान्ये स्वप्रवृतिनिमित्तभूते शबले ययोः तौ। नैतौ जिहासितम् उपाधिकोटिद्वयम् प्रतिपादयतः। व्युत्थितौ लक्ष्यार्थमात्रोपस्थापकौ। अन्योन्याभिसमीक्षणौ एकाखण्डार्थाभिमुख्येन परस्परं व्यवस्थितौ।

[५] वेदान्तसारः, खण्डः २२-२७

[६] वेदान्तपरिभाषा, पृष्ठसङ्ख्या १२७ (‘वयन्तु ब्रूमः...’ इत्यादि)

[७] Preceptors of Advaita, Page 73.

[८] वेदान्तसारः, खण्डः २७

नेति नेत्यर्थं गमयेताम् परस्परम्'[९] इति यदुक्तम् तदनुपपन्नम्, तत्पदं स्वयमेव नेति नेत्यर्थं गमयतीत्यतः। तत एव वेदान्तसारे '...तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धपरोक्षत्वापरोक्षत्वादि-विशिष्टांशम् परित्यज्य अविरुद्धम् अखण्डचैतन्यमात्रं लक्षयति'[१०] इत्युक्तमप्ययुक्तम्, वाक्यार्थस्यांशे विरोध इति हेतुं विनैव श्रुतितात्पर्यमात्रमाश्रित्य तत्पदेन अखण्डब्रह्मचैतन्यस्य लक्ष्यमाणत्वात् तात्पर्यानुपपत्तेरेव वेदान्ते लक्षणाबीजत्वाङ्गीकाराच्च[११]।

## १.२. कल्पनागौरवम्

अत एव श्रुत्या ऋजुतया कृतं तत्त्वप्रतिपादनम् अन्यथाकृत्य द्रविडप्राणायामवत् कार्यं साधितं स्यात्। तथा हि, मुमुक्षुम् प्रति तस्य स्वरूपं खलु बोधनीयं श्रुत्या। जीवस्य स्वरूपञ्च वाचामगोचरमिति अध्यारोपापवादौ समाश्रितौ। ताभ्यां सर्वोपाधिप्रतिषेधमुखेन यल्लक्षितं तदेव तव स्वरूपमस्तीति तत्त्वमसिवाक्येन श्रुतिर्बोधयति। एवमस्वीकृत्य जीवचैतन्यस्य जगत्स्रष्टृत्वाद्युपाधिमच्चैतन्येन अभेदस्यासम्भवात् श्रूयमाणाभेदस्य कथञ्चित् साधनाय लक्षणाऽस्तु इति पक्षः आश्रितश्चेत् तत्र किमप्यौचित्यं न पश्यामः।

## १.३. भाष्यविरोधः

पुनश्च भाष्यवाक्यैरसामञ्जस्यञ्च प्रसज्येत। तथा हि शारीरकमीमांसायाः चतुर्थाध्याये प्रथमपादे आवृत्त्यधिकरणे[१२] वेदान्तभाष्यकाराः श्रीशङ्करभगवत्पूज्यपादाः तत्त्वमसिवाक्यार्थम् एवम् उद्घाटयन्ति–

"ननूक्तं सकृच्छ्रुतं चेत्तत्त्वमसिवाक्यं स्वमर्थमनुभावयितुं न शक्नोति तत आवर्त्यमानमपि नैव शक्ष्यतीति। नैष दोषः...तत्पदेन च प्रकृतं सद्ब्रह्मेक्षितृ जगतो जन्मादिकारणम् अभिधीयते 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म', 'अदृष्टं द्रष्टृ', 'अविज्ञातं विज्ञातृ', 'अजमजरममरम्', 'अस्थूलमनण्वह्रस्वमदीर्घम्' इत्यादिशास्त्रप्रसिद्धम्...एष

---

[९] उपदेशसाहस्री, पद्यप्रबन्धः– १९५

[१०] वेदान्तसारः, खण्डः २७

[११] वेदान्तपरिभाषा, पृष्ठसङ्ख्या १२९ ('लक्षणाबीजन्तु तात्पर्यानुपपत्तिरेव, न त्वन्वयानुपपत्तिः...' इत्यादि)

[१२] ब्रह्मसूत्रम् ४.१.१-२

व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः तथा त्वम्पदार्थोऽपि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया सम्भाव्यमानः चैतन्यपर्यन्तत्वेन अवधारितः।" [१३] इति।

भाष्येऽस्मिन् "प्रकृतं सद्ब्रह्मेक्षितृ जगतो जन्मादिकारणम् अभिधीयते" इत्यध्यारोपप्रदर्शकं वाक्यम्। "...'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म', 'अदृष्टं द्रष्टृ', 'अविज्ञातं विज्ञातृ', 'अजमजरममरम्', 'अस्थूलमनण्वह्रस्वमदीर्घम्' इत्यादिशास्त्रप्रसिद्धम्" इति चापवादप्रदर्शकं वाक्यम्। आभ्यामध्यारोपापवादाभ्यामवगतम् ब्रह्मैव शुद्धचैतन्यं तत्पदार्थ इति भाष्यस्याभिप्रायः। त्वम्पदार्थश्च भाष्येऽत्र प्रत्यगात्मा जीवः प्रोक्तः। एवं स्थिते तत्त्वमसिवाक्यार्थविचारस्य प्रसिद्धप्रणाल्या साकं भाष्यस्यास्य विरोधः स्फुटः। एतद्विरोधपरिहाराय वाक्यार्थविचारस्य प्रक्रियान्तरं कल्पनीयमापतति।

## २. आवृत्त्यधिकरणस्थाम् भाष्योक्तिमाश्रित्य प्रक्रियान्तररचना

सूत्रभाष्यस्य चतुर्थाध्याये प्रथमपादे आवृत्त्यधिकरणे पूर्वोद्धृतभाष्यभागे भगवत्पूज्यपादैः त्वम्पदार्थस्यैव सोपाधिकत्वमुररीकृतम्। तत्पदार्थस्तु तैः 'व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकः' प्रोक्तः। एवञ्च तत्पदस्य निरस्तसमस्तोपाधिकचैतन्यमर्थः, त्वम्पदस्य च सोपाधिकचैतन्यमर्थः, असिपदस्य चाभेदोऽर्थः। एवं तत्त्वमसिवाक्येन त्वम्पदार्थस्य सोपाधिकचैतन्यस्य तत्पदार्थेन निरस्तनिखिलोपाधिकचैतन्येन सहाभेदो बोध्यते। जीवस्य शुद्धम् ब्रह्म स्वरूपम् बोध्यत इति भावः। इमम् बोधं त्वम्पदार्थगतोपाधयः प्रतिबध्नन्ति। तस्मात् श्रुत्युक्ताभेदान्वयान्यथानुपपत्तेः त्वम्पदे भागत्यागलक्षणा। ततश्च निरस्तनिखिलोपाधिकं चैतन्यं त्वम्पदार्थः सिद्धः। अयमेवार्थः जीवस्वरूपभूतः तत्पदेनापि श्रुत्या बोधित इति तत्त्वम्पदयोरुभयोरपि शुद्धचैतन्यमर्थः पर्यवसितः। एवञ्च तत्त्वमसिवाक्याद् अखण्डार्थसिद्धिः। एवं प्रक्रियायां स्थितायां त्वम्पदवाच्यार्थेन सहाभेदान्वयान्यथानुपपत्तिहेतोः तत्पदे लक्षणाश्रयणे नास्ति किमपि प्रयोजनम्, लक्षणया निवर्तितव्यस्य सर्वस्याप्युपाधेः श्रुत्यैव स्वयं निवर्तितत्वात्। 'अस्थूलमनणु...' [१४] इत्यादिश्रुतिभिः यदर्थगतोपाधीनाम् मिथ्यात्वम् बोधितं स एवार्थः केवलचैतन्यं तत्पदेन निर्दिश्यत इति

[१३] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतिलाल् बनारसीदास्) ४.१.२, पृष्ठसङ्ख्या ८२९

[१४] बृहदारण्यकरोपनिषत् ३८८

अपरया लक्षणया तत्पदेन पुनस्तस्यैवार्थस्यापादनम् अनर्थकम्। तत्पदे पूर्विकैः स्वीकृतायाः लक्षणायाः निखिलप्रपञ्चधर्ममिथ्यात्वबोधनं विहाय कार्यान्तरमपि नास्ति। तदुक्तं श्रीनागेशभट्टेन 'धर्मेषु मिथ्यात्वग्रह एव लक्षणेति व्यवहियत'[१५] इति।

अभेदान्वयान्यथानुपपत्तिहेतोः उपाधिक्षयः त्वम्पदार्थे एव भवति, न तु तत्पदार्थे, क्षीणोपाधिकस्यैव चैतन्यस्य तत्पदार्थत्वाद् इत्यस्मिन् सिद्धान्तेऽन्यदप्यस्ति भाष्यप्रमाणम्। तथा ह्याहुर्व्याप्त्यधिकरणस्य[१६] भाष्ये भगवत्पादाः– "अपवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायाम् मिथ्याबुद्धौ निश्चितायाम् पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टायाः मिथ्याबुद्धेर्निवर्तिका भवति। यथा देहेन्द्रियसङ्घाते आत्मबुद्धिरात्मन्येवात्मबुद्ध्या पश्चाद्भाविन्या 'तत्त्वमसि' इत्यनया यथार्थबुद्ध्या निवर्त्यते"[१७] इति। तस्माद्वाक्यश्रवणेन यस्य मुमुक्षोः ज्ञानोदयः तस्य प्रत्यगात्मगतोपाधीनां निश्शेषनिवृत्त्यैव स जात इति स्थितिः।

यश्च पुनरध्यारोपेण श्रुत्या प्रकीर्तितम् आपाततो विज्ञातवान् अनुदितब्रह्मविज्ञानः पुरुषः, तस्यापि त्वम्पदार्थविचारे एवं विशेषतो यतनीयम्, सर्वोपाधिविनिर्मुक्तप्रत्यगात्मैव ब्रह्मेत्यतः। जीवेन स्वोपाधीनां मिथ्यात्वमवगन्तव्यम्, नान्यत्किमपि करणीयमस्ति तस्य। एतदर्थञ्च शास्त्रेण अधिकारिभेदमालोच्य तत्त्वमात्रम् प्रबोधितं, सकृदसकृद्वा विचारश्च चोदितः कर्मोपासनादिसाधनानि च विहितानि।[१८] तस्मात् त्वम्पदार्थविचारे यत्नाधिक्यम् मुमुक्षोः सिद्धम्। स्वयम् पूर्वाचार्यैरत्र सम्मतिरेवम् प्रदर्शिता -

त्वम्पदार्थविवेकाय संन्यासः सर्वकर्मणाम्।
साधनत्वं व्रजत्येव शान्तो दान्तानुशासनात्॥
त्वमर्थम् प्रत्यगात्मानम् पश्येदात्मानमात्मनि।
वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलम्॥

(उपदेशसाहस्री, तत्त्वमसिप्रकरणम् २१९.२२०) इति।

यावद्यावन्निरस्यायं देहादीन् प्रत्यगञ्चति।
तावत्तावत्तदर्थोऽपि त्वमर्थं प्रविवक्षति॥ (नैष्कर्म्यसिद्धिः, ३.२८)

---

१५ व्याससूत्रेन्दुशेखरः, ईक्षत्यधिकरणम्

१६ ब्रह्मसूत्रम् ३.३.९

१७ ब्रह्मसूत्रशाङ्करभाष्यम्, (मोतिलाल् बनारसीदासः) ३.३.९ (पृष्ठसङ्ख्या ६८६)

१८ आश्रमास्त्रिविधाः हीनमध्यमोत्कृष्टदृष्टयः। उपासनोपदेष्टेयं तदर्थमनुकम्पया॥ (गौडपादीयमाण्डूक्यकारिका, अद्वैतप्रकरणम् १६)

इति।

## ३. अस्याम् प्रणाल्यां दोषसम्भावना तन्निवारणञ्च

### ३.१. निरुपाधिकचैतन्यस्य वाचामगोचरत्वमाश्रित्य शङ्कापरिहारौ

नन्वस्याम् प्रणाल्यां तत्पदस्य मुख्यार्थः सर्वोपाधिरहितम् ब्रह्म प्रसज्यते। न चैतद्युक्तं, शुद्धब्रह्मणो वाचामगोचरत्वस्य श्रुतिप्रसिद्धेः।

अत्र समाधीयते– समानदोषनिवारणाय भगवत्पादादिभिराचार्यैः या रीतिरवलम्बिता सा अत्राप्यवलम्ब्यते। तथा हि सर्वाण्यपि परब्रह्मबोधकपदानि नित्यसत्यज्ञानानन्तप्रज्ञानाद्वैतादीनि ब्रह्मेतरव्यावर्तनेन ब्रह्मेतरव्यावृत्तिस्वार्थसमर्पणाभ्यां वा तत्त्वम् प्रतिपादयन्ति। तत्र ब्रह्मेतरव्यावृत्तिमात्रं कुर्वत्सु पदेषु जहल्लक्षणा, स्वार्थसमर्पणमपि कुर्वाणेषु जहदजहल्लक्षणा च स्यात्। सर्वथापि लक्षकान्येव तानि सर्वाणि। तथा हि भाष्यकारभगवत्पादाः ब्रह्मानन्दवल्ल्याः "सत्यं ज्ञानमनन्तम् ब्रह्म"[१९] इति श्रुतेर्व्याख्यानावसरे प्राहुः "तत्रानन्तशब्दोऽन्तवत्त्वप्रतिषेधद्वारेण विशेषणम्। सत्यज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवतः"[२०], किञ्चिदनन्तरम् पुनः "एवं सत्यादिशब्दा इतरेतरसन्निधानाद् अन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यान्निवर्तका ब्रह्मणः, लक्षणार्थाश्च भवन्तीति। अतः सिद्धं 'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह'[२१], 'अनिरुक्तेऽनिलयने'[२२] इति चावाच्यत्वं नीलोत्पलवदवाक्यार्थत्वञ्च ब्रह्मणः"[२३] इति। एवमेवात्रापि तत्पदेन तत्त्वमसीत्यतः पूर्वं यान्यध्यारोपापवादवाक्यानि भवन्ति साक्षात् प्रकरणे श्रुतानि प्रकरणान्तरादुपसंहृतानि च तैः सर्वैरवगतं वस्तु निरस्तसमस्तोपाधिकं ब्रह्म तदितरव्यावर्तनेन लक्ष्यते। यस्मादेवं तत्त्वमसिवाक्ये श्रुत्या प्रतिपिपादयिषितं शुद्धम् ब्रह्म तत्पदस्य लक्ष्यार्थ इत्येव गृह्यते तस्माद् वाचामगोचरत्वश्रुतिविरोधोऽत्र न शङ्क्यः।

### ३.२. जीवब्रह्मैक्यमित्यर्थस्यासिद्धिरित्याक्षेपः तन्निरासश्च

जीवब्रह्मैक्यम् आत्माद्वैतम् अखण्डचैतन्यमित्यनर्थान्तरम्। तस्मात् तत्पदेन श्रुतिबोधितादर्थाद् अभिन्न एव तत्त्वमसिवाक्यादवगम्यमानो

[१९] तैत्तिरीयोपनिषत् २.१.१

[२०] श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ६६९

[२१] तैत्तिरीयोपनिषत् २.४.१

[२२] तैत्तिरीयोपनिषत् २.७.१

[२३] श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ६७१

जीवब्रह्मैक्यरूपोऽर्थः। नैवमिति चेदविश्यमिदं वेदान्तविरुद्धम्। जीवब्रह्मणोरभेदो यद्यखण्डब्रह्मणोऽर्थान्तरं स्यात् तर्हि द्वैतमेव तत्त्वमसिवाक्येन श्रुत्या बोधितं स्यात्। न च जीवस्य ब्रह्मणश्च मध्ये ताभ्याम् भिन्नः कश्चनाभेदाख्यः सम्बन्धो वेदान्तिभिरिष्यते। किं तर्हि। जीवब्रह्मैक्येन अद्वैतमात्रमिष्टम्। तच्च ब्रह्मैव। ननु जीवस्य स्वरूपं ब्रह्मैवेति विशिष्य प्रतिपादनमपीष्टमिति चेत्सत्यम्। तत्तु त्वम्पदेन जीवमनूद्य तत्पदेनाध्यारोपापवादाभ्यामवगतस्य तत्त्वस्याभिन्नतया बोधनेनैव सिद्धम्। त्वम्पदे लक्षणया सकलोपाधिबाधानन्तरन्तु निखिलद्वैतविवर्जितमद्वैतम् ब्रह्मैव वाक्यादवगतम्।

ननु तत्त्वम्पदयोर्द्वयोरपि लक्षणाऽङ्गीकारेण सिद्धोऽर्थो वाक्यतात्पर्यभूतं जीवब्रह्मैक्यं तत्तु तत्पदे लक्षणाभावे न खलु सिध्यतीति चेन्न सिद्ध्यति तदवश्यम्। तत्पदार्थो निवृत्तनिखिलोपाधिक आत्मा, त्वम्पदवाच्यार्थः शारीरक आत्मा चाभिन्नो न भवितुमर्हतीति भागत्यागलक्षणा त्वम्पदे प्रवर्तते। ततश्च निरुपाधिकं ब्रह्मैव त्वम्पदस्याप्यर्थ इति जीवब्रह्मैक्यमथवा आत्माद्वैतं वाक्यार्थोऽवगम्यते। भागत्यागलक्षणा वाक्यस्यैकाधिकेषु पदेषु भवेदिति तु नास्ति नियमः। तात्पर्यसिद्धिं प्रति यदनुपपन्नं तल्लक्षणया परित्यक्तम्।

## ३.३. अव्याकृतोपाधिनिवृत्त्यभावशङ्का तत्परिहारश्च

ननु जीवोऽल्पज्ञत्वादिविशिष्टं चैतन्यमिति त्वम्पदार्थगतेषूपाधिषु कारणोपाधिर्नास्ति। तत्पदार्थे च शुद्धचैतन्ये नास्त्युपाधिसम्भवः येन तत्र कारणोपाधिरन्तर्भाव्येत। ततश्च कारणोपाधेर्बाधः कथं सम्भवतीति चेदुच्यते– कारणोपाधिरपि जीवात्मन एव, नान्यस्य कस्यापि। अव्याकृतोपाधिरात्मैव प्राज्ञः प्राण इति माण्डूक्यभाष्ये स्पष्टीकृतम्। अव्याकृतपर्यन्तोपाधिबाधया च जीवस्य तुरीयाख्यब्रह्मणा अभेदमुपदिशति। तथा हि माण्डूक्यश्रुतिः "अयमात्मा ब्रह्म"[२४] इति प्रतिज्ञाय ततस्तस्यैवात्मनो जीवस्य तिसृष्ववस्थासु पूर्वोक्तत्रिविधेनोपाधिनोपहितस्य अव्याकृतपर्यन्तान् सर्वानुपाधीन् त्रिषु पादेष्वन्तर्भाव्य तत आदावुक्तम् ब्रह्म जीवस्य तुरीयपादत्वेन कल्पितं जीवस्यैव वास्तविकं स्वरूपं "नान्तः प्रज्ञं न बहिष्प्रज्ञम्"[२५] इत्यादिमन्त्रेण सर्वोपाधिप्रतिषेधद्वारा बोधयति। तस्माज्जीव इति न केवलं सूक्ष्मशरीरोपाधिक आत्मा उच्यते, कारणोपाधिविशिष्टस्य प्राज्ञस्यापि

[२४] माण्डूक्योपनिषत् २
[२५] माण्डूक्योपनिषत् ७

जीवशब्देन ग्रहणात्। तथा हि कारिका -

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा॥
(माण्डूक्यकारिका, आगमप्रकरणम्– १६) इति।

अत्र च भाष्यम्-

'योऽयं संसारी जीवः, स उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मना अन्यथाग्रहणलक्षणेन चानादिकालप्रवृत्तेन मायालक्षणेन स्वापेन...सुप्तः यदा...तत्त्वमसीति प्रतिबोध्यमानः तदैवम् प्रतिबुध्यते...'[२६] इति।

अत्र भाष्ये जीवस्यैव तत्त्वाप्रतिबोधरूपो बीजात्मा स्वाप इति स्पष्टप्रतिपादनम्, ईदृशं जीवं प्रति गुरूपदेशे तत्त्वमसीति वाक्यस्योद्धरणञ्च प्रकृतप्रसङ्गे सिद्धान्तं सुतरां समर्थयति। तत्त्वाप्रतिबोध एव अव्याकृतोपाधिर्वेदान्ते। सोऽपि यदि त्वम्पदार्थस्य जीवात्मन एव तर्हि तत्पदार्थस्यात्मनः कल्पयितुमुपाधिरन्यः कोऽवशिष्यते। अपि च 'नास्येवं त्वं हेतुफलात्मकः' इत्युपदेशेन त्वम्पदार्थ एव हेतुफलात्मकोपाधिग्रस्त इत्यवगम्यते, अन्यथा उपदेशस्यास्यानर्थक्यं प्रसज्येत। हेतुरिति तत्त्वाग्रहणरूपा अव्याकृता कारणाविद्या, फलमिति च तत्त्वान्यथाग्रहणरूपा जाग्रत्स्वप्नस्थानद्वयगता व्याकृता कार्याविद्या प्रोक्ता। तदेव भाष्यकाराणाम् परमगुरुभिरपरस्यां कारिकायाम् प्रकाशितम्– 'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ। प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यतः॥'[२७] इति।

अपि च 'जीवं कल्पयते पूर्वम्...॥'[२८] इत्यस्याः कारिकायाः भाष्येऽप्युक्तम् भगवत्पादैः -

'बाह्याध्यात्मिकानाम् भावानाम् इतरेतरनिमित्तनैमित्तिकतया कल्पनायाः किम् मूलमित्युच्यते।... कल्पयते...'[२९] इति।

भगवत्पूज्यपादैरत्र सृष्टिविषयकसङ्कल्पवान् परमात्माऽपि जीवः प्रोक्तः, किमुतात्यन्ताव्याकृताभिमानी प्राणः। विश्वतैजसप्राज्ञा एवं तत्तदवस्थागताः जीवा एवेत्यतः त्वम्पदार्थस्य वाच्यार्थः त्र्यवस्थो जीवो भवतीति त्वम्पदे भागत्यागलक्षणाप्रवृत्तौ व्याकृताव्याकृतनिखिलप्रपञ्चस्यापि प्रतिषेधः सिद्ध्यति।

---

[२६] श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ४१९
[२७] माण्डूक्यकारिका, वैतथ्यप्रकरणम् ११
[२८] माण्डूक्यकारिका, वैतथ्यप्रकरणम् १६
[२९] श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ४३८

वाक्यविचारस्थले स्वीकृतेयं लक्षणा तत्त्वानुभवकाले उपाधिषु मिथ्यात्वग्रह एवेति पूर्वमुक्तम्[३०]। एवं सति मुमुक्षुणा परिहर्तव्याः उपाधयः सर्वे प्रत्यगात्मन्यारोपिताः एव भवन्तीत्यायातम्। प्रत्यगात्मन एव सर्वे उपाधय इति माण्डूक्यश्रुतिरपि अवस्थात्रयं विचारयन्ती दर्शयति। आविद्यकाः सर्वे जीवधर्माः स्थूलसूक्ष्मकारणशरीररूपेण वा अवस्थात्रयरूपेण वा अन्नमयादिकोशरूपेण वा श्रुतौ परिकल्पिताः। एतेषामेव मिथ्यात्वावगत्या स्वस्वरूपानुसन्धानात् सञ्जातया सकलोपाधिषु निरन्तरमनुवर्तमाने सकलोपाध्यधिष्ठानभूते सर्वोपाधिधर्मशून्ये तुरीयेऽद्वैते परमात्मन्यवस्थितिः कैवल्यम्।

## ३.४. समष्ट्युपाधित्रयनिवृत्त्यभावशङ्का तत्परिहारश्च

ननु तथापि त्वम्पदमात्रे लक्षणाप्रवृत्तौ जीवस्यैव स्थूल-सूक्ष्म-कारणो-पाधयो निवर्त्येरन्। समष्टिस्थूल-सूक्ष्म-कारणो-पाधीनान्तु का कथा। न तु तेषाम् अपि निवृत्त्यभावेऽद्वैतं सिद्ध्यति। जीवगतव्यष्ट्युपाधित्रयमात्रनिवृत्तौ तु साङ्ख्यादिदर्शने यथा तथा दृष्टः स्यादात्मा, न च तद्दर्शनम् परमपुरुषार्थप्रदायकमिति चेन्न, जीवगतव्यष्ट्युपाधीनां तत्तत्समष्ट्युपाधिरूपत्वं सम्पाद्यैव निवर्त्यमानत्वात्।

निखिलोपाधिनिरासेनापरोक्षानुभवसिद्धिम् उद्दिश्य शास्त्रेणोपदिष्टासू-पासनासु सर्वत्रापि प्रत्येकमवस्थासु व्यष्ट्युपाधिकजीवस्य समष्ट्युपाधिकाभेददर्शनपूर्वकम् एवोपाधिनिरासो विधीयते। अधस्ताद् उदाहरणानि प्रदर्श्यन्ते।

माण्डूक्यकारिकाया आगमप्रकरणे उपनिषदः तृतीयमन्त्रस्य भाष्ये प्रोच्यते- "कथम् 'अयमात्मा ब्रह्म' इति प्रत्यगात्मनोऽस्य चतुष्पात्त्वे प्रकृते द्युलोकादीनाम् मूर्धाद्यङ्गत्वमिति।...सर्वद्वैतोपशमे चाद्वैतमिति"[३१] इति।

एवञ्च जाग्रदवस्थाकव्यष्ट्युपाधिकजीवस्य विश्वस्य तदवस्थाकसमष्ट्यु-पाधिकात्मना विराजा, स्वप्नावस्थाकव्यष्ट्युपाधिकजीवस्य तैजसस्य तदवस्थाकसमष्ट्युपाधिकात्मना हिरण्यगर्भेण, सुषुप्त्यवस्थाकजीवस्य प्राज्ञस्य तदवस्थाकसमष्ट्युपाधिकात्मना ईश्वरेण चाभेददर्शनपूर्वकमेव त्र्यवस्थस्य अस्यात्मनः सर्वोपाधिक्षयेण तुरीयब्रह्ममात्रत्वमवगम्यते। सुषुप्त्यवस्थाकस्य प्राज्ञस्य ईश्वरेणाभेदस्तु माण्डूक्यश्रुत्या शब्दश एवोक्तम्– एष सर्वेश्वर एष

[३०] अत्रैव (२.), "तदुक्तं श्रीनागेशभट्टेन..." इत्यादि द्रष्टव्यम्

[३१] श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ४००

सर्वज्ञः…”[३२] इत्यादि। प्रत्यगात्मनस्त्रिविधोपाधिमिथ्यात्वमवगमय्य जीवस्य सर्वोपाधिविवर्जिततुरीयब्रह्माभिन्नत्वम् बोधयितुम् प्रवृत्तायाम् माण्डूक्यश्रुतौ रीतिरियमेवञ्च स्पष्टैव।

तैत्तिरीयोपनिषदो ब्रह्मानन्दवल्ल्यां श्रुतस्य पञ्चकोशविवेकस्य सारम् भाष्यकारभगवत्पादा एवमाहुः– “अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्योऽभ्यन्तरतमम् ब्रह्म…प्रस्तौति…”[३३] इति।

वल्ल्याम् अस्यां श्रुतिर्ब्रह्मणः पञ्चभूतसृष्ट्युपन्यासमुखेन अध्यारोपं व्यतनोत्। ततोऽपवादं वितन्वाना सा जीवस्य पञ्च कोशान् विविनक्ति। अन्नमयादिकोशेषु प्रसिद्धाम् आत्मबुद्धिम् अनूद्य सा क्रमेण मुमुक्षुं तत्त्वं प्रति नयति शाखाचन्द्रन्यायेन। अन्नमयादीनां निषेधकाले व्यष्टिसमष्ट्युभयविधान्नमयादिप्रपञ्चप्रतिषेधसम्भवार्थं श्रुतिः व्यष्ट्यन्नमयादि-कोशाभिमानिन आत्मनः समष्ट्यन्नमयादिकोशाभिमानिना जीवेन सहाभेदम् अपि बोधयति। तथा ह्यन्नमयकोशं जीवस्योपन्यस्य श्रुतिः– ‘अन्नाद्वै प्रजाः प्रजायन्ते’[३४] इत्यादिवाक्यैः व्यष्ट्यन्नमयकोशाभिमानिनो जीवस्य समष्ट्यन्नमयकोशाभिमानिना जीवेनाभेदं दर्शयति। प्राणमयकोशम् उपन्यस्य पुनः श्रुतिः ‘प्राणं देवा अनु प्राणन्ति’[३५] इत्यादिना व्यष्टिसमष्टिप्राणा-भिमानिनोरभेददर्शनं विदधाति। एवं पञ्चस्वपि कोशेष्वभेददर्शनानि विहितानि। नन्वानन्दमयस्थले नैवं व्यष्टिसमष्ट्यभेददर्शनं श्रुतम् इति चेद् उच्यते साक्षाद् अश्रुतम् अपि आनन्दमयकोशस्याप्यविद्यावृत्तिरूपत्वाद् व्यष्टिसमष्टिकल्पना शक्येत्यतः पूर्वपूर्वकोशविषयकोपासनासु यच्छ्रुतं तदनुरोधेनात्रापि व्यष्टिसमष्ट्यभेदभावना विहितैव बोध्येति। एवञ्च पञ्चकोशप्रतिषेधेन शरीरत्रयेऽपि प्रतिषिद्धे निखिलप्रपञ्चोपशमेऽद्वैतमात्मनः सिद्ध्यति।

पञ्चीकरणाख्यं प्रकरणग्रन्थतल्लजं वेदान्तसम्प्रदाये नितरां प्रसिद्धिम् आपन्नम्। एतदधि श्रीसुरेश्वराचार्यकृतवार्त्तिकोपलब्धेः भगवतो भाष्यकाराद् नान्योऽस्य प्रणेतेति ज्ञायते। भगवत्पूज्यपादाः ग्रन्थेऽस्मिन्नल्पैर्वाक्यैः श्रवण-मनन-निदिध्यासन-पराणाम् परमहंसपरिव्राजकानां समाधिविधिम्

[३२] माण्डूक्योपनिषत् ६

[३३] श्रीशङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ६७९

[३४] तैत्तिरीयोपनिषत् २.२.१

[३५] तैत्तिरीयोपनिषत् २.३.१

उपदिशन्ति। सुललितश्लोकरूपाणि च वार्त्तिकानि परमपुरुषार्थप्रदायिन्या अस्या उपासनायाः रहस्यं विवृण्वन्ति। तथा हि पञ्चीकरणे, विराडाख्यस्थूलशरीरं जागरिताख्यप्रत्ययम् एतदुभयाभिमानिविश्वाख्यम् आत्मानञ्च ओङ्कारस्य प्रथमपादेऽकारेऽन्तर्भाव्य तयैव रीत्या हिरण्यगर्भस्वप्नतैजसान् उकारे, अव्याकृतसुषुप्तिप्राज्ञान् मकारे च विभाव्य भगवत्पादा अद्वैते चित्तसमाधानप्रकारम् एवम् आहुः– "अकार उकारे, उकारो मकारे, मकार ओङ्कारे... 'अयमात्मा ब्रह्म' इत्यादिश्रुतिभ्यः।" [३६] इति।

अत्र प्रत्येकम् पादानाम् उत्तरत्र प्रविलापनात्पूर्वं समाधित्सोर्दर्शनानि विधीयन्ते वार्त्तिककारैः "विश्वं वैराजरूपेण पश्येद्भेदनिवृत्तये" [३७], "हिरण्यगर्भरूपेण तैजसं चिन्तयेद्बुधः" [३८], "जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत्" [३९] इत्येवम्। तदेवम् माण्डूक्यतैत्तिरीयादिश्रुतिष्ववलम्बिताया अत्र दर्शितायाः रीत्याः वार्त्तिकसम्मतिरपि सिद्धा।

एवञ्च शास्त्रे सर्वत्र व्यष्ट्युपाधिकजीवस्य समष्ट्युपाधिकाभेददर्शनेनैव उपाधिनिरासो विधीयत इत्यतः त्वम्पदवाच्यस्य जीवस्योपाधीनाम् मिथ्यात्वावगतिः समष्ट्युपाधिकाभेददर्शनपूर्विकैवेति तत्त्वमसि-वाक्य-विचारस्य प्रकृतप्रणाल्यां समष्ट्युपाधित्रयनिवृत्त्यभावशङ्का परिहृता।

## ४. वाक्यस्य मूलसन्दर्भमाश्रित्य शङ्कापरिहारौ

### ४.१. "ननु कारणोपाधिमत् सद्ब्रह्म तत्पदेन श्रुत्या प्रतिपिपादयिषितम्...।"

ननु छान्दोग्योपनिषदि प्रकृतवाक्यसन्दर्भपर्यालोचनेन जगत्कारणम् ईश्वरचैतन्यम् एव सद्ब्रह्म प्रतिपादयितुम् इष्टम् अवगम्यते, न तु निरुपाधिकं ब्रह्मेति चेदुच्यते मूलसन्दर्भमात्रपर्यालोचनया जगद्बीजोपाधिकम् एव ब्रह्मावगम्यत इति हठात् स्वीक्रियते चेदपि नैतत् परिशुद्ध्यति। वेदान्तवाक्यानां हि तात्पर्यनिर्णये प्रकरणमात्रम् एव न खलु प्रमाणम्। श्रुतेः तात्पर्यम् प्रतिप्रकरणम् भिद्यते चेदेव प्रकरणे प्रकरणान्तरस्य कोऽपि सम्बन्धो न स्यात्। नैवम् पूर्वोत्तरमीमांसकेषु कोऽपि वक्तुम् अर्हति गुणोपसंहारन्यायानाम् पूर्वोत्तरशास्त्रेषु महता प्राधान्येन विचारितत्वात्। वेदान्ती च विशेषतः सर्वासाम् उपनिषदां तात्पर्यम् परमे ब्रह्मणीत्युद्घोषयन्

[३६] पञ्चीकरणवार्तिकम्
[३७] पञ्चीकरणवार्तिकम् ३१
[३८] पञ्चीकरणवार्तिकम् ३९
[३९] पञ्चीकरणवार्तिकम् ४३

तासाम् एकशास्त्रत्वेनैव ग्रहणम् इच्छति। वेदान्ते तस्माद् वाक्यार्थनिर्णये वैयासिकन्यायानुसारं गुणोपसंहारः कार्यः। कृतश्च भाष्यकारादिभिः परमप्रमाणभूतैः सर्वैरप्यस्मत्सम्प्रदायगतैराचार्यैः। किञ्च विना गुणोपसंहारं कथं वेदान्तानाम् एकत्र तात्पर्यनिर्णयरूपं श्रवणम्। कथन्तरां श्रुतेः श्रुत्यन्तरेण विरोधशङ्कायां तन्निवारणाय मननम्। भाष्योक्तयश्च न सामञ्जस्यम् प्राप्नुयुः। तस्मात्प्रकृतसन्दर्भेऽपि गुणोपसंहारः कर्तव्यः।

किञ्च सदिति निरस्तसमस्तोपाधिकम् ब्रह्मैव श्रुतिः निर्दिदिक्षतीति 'एकमेवाद्वितीयम्'[४०] इति वाक्यशेषाद् ज्ञायते। तदिदं व्याख्यातम् अद्वैतसिद्धिटीकायाम् बालबोधिन्यां शीतांशुशेखरबागचीमहाभागैः–tab "अद्वैतप्रतिपादकं यत् 'एकमेवाद्वितीयम्' इति वाक्यं...तदेव 'अद्वितीयम्' इति श्रुत्वा निषिद्ध्यते"[४१]

किञ्च, अध्यारोपापवादाभ्यां हि शास्त्रे ब्रह्म प्रतिपाद्यते। तद्ब्रह्मैव जीवस्वरूपमिति चोपदिश्यते। क्वचिच्छ्रुतौ जीवस्वरूपविषयिणीं जिज्ञासामुपन्यस्य ततोऽध्यारोपापवादन्यायेन निर्गुणं ब्रह्म बोधयन्ती श्रुतिः एतद् द्वयमपि साधयति यथा ऐतरेयस्य तृतीयाध्याये। क्वचिच्च स्पष्टं जीवब्रह्मैक्यमुक्त्वा जीवस्वरूपविचारेण प्रत्यगात्मनः परमात्मनाऽभेदम् प्रदर्शयति यथा माण्डुक्योपनिषदि। पुनः कुत्रचित् ब्रह्मणः साक्षात्स्वरूपमेवादौ प्रतिज्ञाय ब्रह्मण्यध्यारोपं जीवे चापवादं करोति भगवती श्रुतिः, यथा तैत्तिरीयकस्य ब्रह्मानन्दवल्ल्याम्। अत्र तु छान्दोग्यस्य षष्ठाध्याये परब्रह्मप्रतिपादनं तस्य जीवाभेदकथनञ्च क्रमेण कृतम्। अध्यारोपापवादप्रक्रियायाम् अव्याकृतप्रकृत्युपाधिकः सर्वज्ञः सर्वशक्तिरीश्वरो जगत्कर्ता प्रथममवधार्यते श्रुत्या। ततोऽपवादवाक्यैः जगत्कर्तृत्वोपाधिमपि निरस्य श्रुतिस्तदेव चैतन्यं केवलं बोधयतीति रीतिः। एवमध्यारोपे जगज्जन्मादिकारणोपाधिसहितं ततोऽपवादे तद्रहितञ्च बोधितमेकमेवेदं तत्त्वं त्र्यवस्थस्यापि जीवस्य स्वरूपमुपदिश्यते। तत्त्वमसिवाक्यमपि त्वम्पदार्थस्य जीवस्य स्वरूपबोधनपरम्। स्वरूपञ्च वाक्येऽस्मिन् तत्पदार्थः स्यात्। तस्माद् अध्यारोपापवादाभ्यां बोधितम् ब्रह्मैव तत्त्वमसिवाक्ये तत्पदार्थः।

ननु छान्दोग्योपनिषदि सद्ब्रह्मणो जगत्कारणत्वम् प्रतिपाद्य तस्य प्रतिषेधकं वाक्यं किमप्यनुपन्यस्यैव श्रुतिः

---

[४०] छान्दोग्योपनिषत् ६.२.१

[४१] अद्वैतसिद्धेः बालबोधिनीटीका (रत्ना पब्लिकेशन्स्), प्रथमो भागः, पृ. ७

तत्त्वमसीत्युपदिशतीत्यतो जगत्कारणत्वोपाधिकं ब्रह्मैव तत्पदार्थ इति चेन्न, जगत्कारणत्वप्रतिपादनेनाध्यारोपः कृत इत्यस्माद्धेतोः तदनन्तरमपवादोऽप्यवश्यं कृत एव स्यात्। अपवादोऽत्र न श्रूयत इति चेन्न तत्त्वमसिवाक्यश्रवणात् पूर्वं "स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा"[४२] इत्येवं श्रुतस्य अपवादार्थकत्वात्। अत्र 'स' इत्येतदुद्दिश्य 'ऐतदात्म्यम्' इति विहितत्वात् जीवब्रह्मैक्यमेवात्र बुद्ध्यते। तथा च भाष्यम् -

"स यः सदाख्य एष उक्तोऽणिमाऽणुभावो...आत्मना आत्मवत् सर्वमिदं जगत्"[४३] इति।

तस्मात् "स य एषोऽणिमा..." इत्यादिवाक्यमपि तत्त्वमसिवाक्यवद् जीवब्रह्मैक्यबोधनपरमेव। एवं स्थिते तत्त्वमसिवाक्ये यथा लक्षणादिप्रवृत्तिरिष्यते सा त्वत्रापि बोध्या। ततश्च स य एषोऽणिमैतदात्म्यमिदं सर्वम्" इति वाक्ये 'स' इत्यस्यार्थो निरुपाधिकचैतन्यमेव सिद्धम्, यच्च पुनः तत्पदेन त्वम्पदार्थमुद्दिश्य विधीयते। तस्मात् तत्त्वमसिवाक्ये तत्पदार्थो निरुपाधिकम् ब्रह्मैव भवितुमर्हति। अपि च "तत्सत्यं स आत्मा" इत्यपि जीवब्रह्मैक्यबोधनपरमेव वाक्यम्। तथा चात्र भाष्यम्-

"येन चात्मना आत्मवत्सर्वमिदं जगत्,...गवादिशब्दवत् निरूढत्वात्"[४४] इति।

जगद्गुरुभाष्यकारभगवत्पूज्यपादैरिदं वाक्यं तादर्थ्येनान्यत्रापि भाष्ये उद्धृतम्। तथा हि माण्डूक्यकारिकायाः आगमप्रकरणे उपनिषदः सप्तममन्त्रस्य भाष्ये प्रोच्यते– "...न च तुरीयस्यात्मत्वानवगमे कारणमस्ति, सर्वोपनिषदां तादर्थ्येनोपक्षयात् 'तत्त्वमसि', 'अयमात्मा ब्रह्म', 'तत्सत्यं स आत्मा'...इत्यादीनाम्"[४५] इति। तत्त्वमसीत्यादिवाक्येषु निरस्तसमस्तोपाधिकम् ब्रह्मैव श्रुतिरात्मेत्युपदिशति, न तु सोपाधिकमित्येतदपि भाष्यवचनादस्माद् अवगम्यते, माण्डूक्ये तुरीयस्य निरस्तसमस्तोपाधिकत्वश्रवणात्। एवञ्च त्वम्पदमात्रे भागत्यागलक्षणास्वीकारपुरस्सरं या प्रणालिरस्माभिः तत्त्वमसिवाक्ये प्रपञ्चयितुमिष्यते सैव "स य एषोऽणिमा..." इत्यादिवाक्येऽपि बोद्धव्या।

---

[४२] छान्दोग्योपनिषद्भाष्यम् ६.८.७

[४३] श्रीशङ्करग्रन्थावलिः, भागः ९ (छान्दोग्योपनिषद्भाष्यम्) पृष्ठसङ्ख्या ३८५

[४४] श्रीशङ्करग्रन्थवलिः, भागः ९ (छान्दोग्योपनिषद्भाष्यम्) पृष्ठसङ्ख्या ३८५

[४५] श्रीशङ्करग्रन्थवलिः, भागः ९ (छान्दोग्योपनिषद्भाष्यम्) पृष्ठसङ्ख्या ३८५

तस्मात् “सदेव सोम्य...”[४६] इत्याद्यध्यारोपेण “स य एषोऽणिमा...”[४७] इत्यपवादेन च निरस्तसमस्तोपाधिकं यद्ब्रह्म श्रुतं तदेव तत्त्वमसिवाक्ये तत्पदार्थ इति स्थितम्।

अथवा गुणोपसंहारेणात्र अपवादो बोद्धव्यः। गुणोपसंहारपुरस्सरं हि भाष्यकारभगवत्पूज्यपादाः आहुः-

“तत्पदेन च प्रकृतं सद्ब्रह्मेक्षितृ जगतो जन्मादिकारणम् अभिधीयते ‘सत्यं ज्ञानमनन्तं ब्रह्म’,...वेदान्ताभियुक्तानां प्रसिद्धः।”[४८] इति।

नन्वपवादसिद्धये किमर्थं गुणोपसंहार आश्रीयते यदाऽन्येन सुकरेणोपायेन तत्सिद्धिः स्यात्। तत्पदार्थेऽध्यारोपितस्य उपाधेर्बाधाय खल्वपवादकश्रुतिवाक्यानि उपसंह्रियन्ते। अपवादविषये यदुक्तम् भाष्यकारभगवत्पूज्यपादैः-

“अपवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायाम् मिथ्याबुद्धौ निश्चितायाम् पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टायाः मिथ्याबुद्धेर्निवर्तिका भवति”[४९] इति। तस्य वस्तुन्यारोपितानामुपाधीनाम् यथार्थत्वबुद्ध्युपहननमिति तात्पर्यम्। उपाधिप्रतिषेध इति यावत्। इदमेवापवादस्य कार्यं भागत्यागलक्षणयापि साध्यतेऽस्माभिः। तथा हि तत्त्वमसिवाक्येन अध्यारोपितजगत्कारणत्वोपाधिकस्यैव ब्रह्मणो जीवेनाभिन्नत्वे प्रोक्ते जहदजहल्लक्षणया त्वम्पदार्थस्येव तत्पदार्थस्यापि उपाधिक्षयः। स एवापवादवाक्योपसंहारेणापि साधयितुमिष्टः। तस्मात् प्रकरणान्तरगतवाक्यानाम् बलादाकर्षणादपि मुख्ययाऽमुख्यया वा वृत्त्या तत्तत्प्रकरणस्थैरेव वाक्यैः तत्तत्प्रकरणे श्रुतितात्पर्यावगमनं वरमिति चेन्न, शास्त्रार्थनिर्णये गुणोपसंहारस्य अवश्यकर्तव्यताकत्वात्। प्रकृतिभ्यो गुणान् अनुपसंहृत्य विकृतिस्थलगतवाक्यमात्रमाश्रित्य अर्थनिश्चयं कृत्वा प्रवर्तमानो वैदिकः कर्मणा किं फलमवाप्नुयात्। तस्माद् गुणोपसंहारः कर्मोपासनाकाण्डयोर्यथा ज्ञानकाण्डेऽपि कर्तव्य एव।

तस्मात् तत्त्वमसिवाक्ये तत्पदेन कारणोपाधिमत् सद्ब्रह्म श्रुत्या बोधितमिति मतम् अत्यन्तमनुपपन्नमिति सिद्धम्।

---

[४६] छान्दोग्योपनिषत् ६.२.१

[४७] छान्दोग्योपनिषत् ६.८.७

[४८] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) ४.१.२, पृष्ठसङ्ख्या ८२१

[४९] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) ३.३.९, पृष्ठसङ्ख्या ६८६

## ४.२. ननु श्वेतकेतोर्विनैव गुणोपसंहारमवगतिः...।

ननु श्वेतकेतोरुद्दालकस्योपदेशमात्रमेव शरणमासीत्। जगत्कारणं सद्ब्रह्म प्रतिपाद्य तदुपाधेरपवादमकृत्वा अपवादकश्रुतिमुपसंहरेत्यनुक्त्वा च तत्त्वमसीति श्वेतकेतुमुपदिदेश पिता। तस्मात् सोपाधिकचैतन्यमेव तत्पदस्य वाच्यार्थः श्वेतकेतुना गृहीतः। ततश्च त्वम्पदे यथा, तत्पदेऽपि तदर्थगतोपाधेः मिथ्यात्वमवगम्यैव (शाब्दबोधप्रकारविचारणायान्तु तदर्थगतोपाधिं लक्षणया परित्यज्यैव इत्यर्थः) तेनात्माद्वैतम् बुद्धमिति स्वीकार्यमिति चेदुच्यते– कोऽत्र विचारः, कस्यचिन्मुमुक्षोरद्वैतावगतिः कथङ्कारं स्यादिति, आहोस्वित् छान्दोग्ये श्रुतस्य तत्त्वमसीत्यस्य वाक्यस्य किं तात्पर्यमिति। कस्यचिद् अद्वैततत्त्वावगतिः कथं जायत इति श्रुतिवाक्यानाम् तात्पर्यविचारेण खलु बुद्ध्यते। तस्मात् प्रथमं तावत् वाक्यार्थविचारणा कार्या। मीमांसानुमोदिततर्कैः पदार्थनिर्धारणपुरस्सरं वाक्यार्थनिर्धारणे कृते सति अनयैव रीत्या पदपदार्थतत्सम्बन्धग्रहणपूर्वकम् एतद्वाक्यं श्रोत्रियाच्छ्रुत्वा शुद्धसत्त्वाः अद्वैतमनुभवन्तीत्येतत् निश्चीयते। एवमकृत्वा परमप्रमाणभूतानि श्रुतिवाक्यानि परित्यज्य श्वेतकेतोः कथमवगतिर्जातेति यत्किमपि स्वयमनुमाय तदाश्रित्य वाक्यार्थो नियम्यते चेन्नेदम् ब्राह्मणस्य युक्तम्।

वेदान्ते आख्यायिकानां वास्तविकत्वानङ्गीकाराच्च शङ्केयमसङ्गता। तत्त्वप्रतिबोधनपराणां श्रुतिवाक्यानाम् परिशीलनेन यः सिद्धान्तो निर्धारितः, स न बोधनसौकर्याय कल्पिताभिः कथाभिरन्यथा क्रियते। कथास्तु सिद्धान्तानुगुणम् परिवर्तनीयाः, न तु कल्पितेन कथावस्तुना सिद्धान्तः परिवर्त्यते। एतदेवाभिप्रेत्योक्तं सृष्टियाथात्म्यविचारावसरे श्रीगौडभगवत्पूज्यपादैः– “भूततोऽभूततो वापि सृज्यमाने समा श्रुतिः। निश्चितं युक्तियुक्तं च यत्तद्भवति नेतरत्॥”[५०] इति।

## ४.३. अक्षरध्यधिकरणानुसारमत्र गुणोपसंहारः

वेदान्तशास्त्रेऽनुवर्तनीयाः गुणोपसंहारन्यायाः भगवता बादरायणेन ब्रह्मसूत्रस्य तृतीयाध्याये तृतीयपादे समुपनिबद्धाः। तत्र ह्युपास्यब्रह्मविषयकश्रुतीः ज्ञेयब्रह्मविषयकश्रुतीश्चोद्दिश्य गुणोपसंहारो बहुधा दर्शितः। सर्वमपि तन्न्यायजातं नात्र विषयताम् भजते। अत्रोपयोगि

[५०] माण्डूक्यकारिका, अद्वैतप्रकरणम्– २३

सूत्रमेतत्– “अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्”[५१] इति। अस्य च भाष्ये जगद्गुरुपूज्यपादा आहुः -

“...विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिरुत व्यवस्थेति संशये...तत्र किमित्यन्यत्र कृता बुद्धयोऽन्यत्र न स्युः”[५२] इति।

तस्मादक्षरध्यधिकरणानुसारमेव भाष्यकारपूज्यपादैः तत्त्वमसिवाक्येऽपि तत्पदार्थकथनावसरे छान्दोग्यश्रुत्या परस्मिन्नक्षरे ब्रह्मण्यध्यारोपितानां विशेषाणामपवादाय अन्यत्रोपनिषदि श्रुतानि वाक्यानि “अस्थूलमनणु...”[५३] इत्यादीन्युपसंहृतानीति विज्ञायते। तस्माद् अक्षरध्यधिकरणन्यायेन छान्दोग्यस्य षष्ठाध्याये अपवादवाक्यान्युपसंहृत्य तैः सद्ब्रह्मणः कारणोपाधिं निरस्य चावगम्यमानं शुद्धम् ब्रह्मैव तत्पदेन श्रुत्या निर्दिश्यत इति सिद्धम्।

## ४.४. छान्दोग्ये सद्ब्रह्मोपाध्यपवादाय गुणोपसंहारो भगवत्पादाभीष्ट इत्यत्रापरम् प्रमाणम्।

जगद्गुरवः श्रीशङ्करभगवत्पूज्यपादाः माण्डूक्यकारिकाभाष्ये आगमप्रकरणस्य द्वितीयकारिकायाः व्याख्यानावसरे प्राहुः -

“...कथं प्राणशब्दत्वम् अव्याकृतस्य। ‘प्राणबन्धनं हि सोम्य मनः’[५४] इति श्रुतेः...त्रिधा देहे व्यवस्थित इत्युच्यते।”[५५] इति।

अत्र भाष्ये प्राण इति अव्याकृतात्मा प्राज्ञः प्रसवबीजात्मक उच्यते। प्राणशब्देन कथमत्र सुषुप्त्यभिमानी आत्मा उच्यते इति प्रश्नः (माण्डूक्ये इतः किञ्चित् परं ‘प्रभवः सर्वबीजानाम्...’ इत्यादिषष्ठकारिकायाम् प्राणशब्देन कारणात्मा वक्ष्यते श्रीगौडपादभगवत्पूज्यपादैरिति दृष्ट्वा भगवन्तो भाष्यकाराः अत्रापि तेनैव शब्देन प्राज्ञं कारणात्मानं निर्दिशन्तीति स्फुटम्)। उद्धृते छान्दोग्यमन्त्रेऽपि अव्याकृतात्मैव प्राणशब्देनोक्त इति समाधानम्। अत्र मन्त्रे अव्याकृतात् प्रसवबीजशक्तेरपि भिन्नं शुद्धं ब्रह्मैव बोधितं प्राणशब्देनेति पूर्वपक्षी। नेति सिद्धान्ती। ब्रह्मैव प्राणशब्देनोक्तमिति सत्यम्, किन्तु अव्याकृतत्वमपरित्यज्यैव। अत एव अव्याकृतस्य प्रतिषेधार्थम् ‘अविदितादधि’ इत्याद्युक्तिः। एवञ्च सद्ब्रह्मण अव्याकृतोपाध्यपनयनाय

[५१] ब्रह्मसूत्रम् ३.३.३३
[५२] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) ३.३.३३, पृष्ठसङ्ख्या ७३६
[५३] बृहदारण्यकोपनिषद् ३.८.८
[५४] छान्दोग्योपनिषत् ६.८.२
[५५] श्रीशाङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ४०७

श्रुत्यन्तरगतवाक्यानि भगवत्पादैः समाश्रितानि। तस्मात् छान्दोग्ये सद्ब्रह्मोपाध्यपवादार्थं गुणोपसंहारमिच्छन्ति भगवत्पादा इत्यनवद्यम्।

## ५. उक्तप्रणालीस्वीकारे शास्त्राचार्योपदेशसङ्गतिः

एवञ्च तत्त्वमसिवाक्ये लक्षणाप्रवृत्तेः पूर्वमेव तत्पदार्थोऽध्यारोपापवादाभ्याम् बोधितं शुद्धम् औपनिषदं ब्रह्म परमात्मा, त्वम्पदार्थश्च सर्वविधोपाध्युपहितो जीवात्मेत्यङ्गीकर्तव्यम्। इत्थम् अन्वयानुपपत्तिमुखेन लक्षणाया अङ्गीकारं विनैव शुद्धम् ब्रह्म तत्पदार्थ इति स्वीकृते शास्त्राचार्योपदेशाः सङ्गताः भवन्ति।

### ५.१. छान्दोग्यभाष्यसङ्गतिः

तथा हि छान्दोग्योपनिषदः षष्ठाध्याये भाष्यस्यान्ते भगवत्पादैरुक्तम्– "तस्माद् विकारानृताधिकृतजीवात्मविज्ञान-निवर्तकम् एवेदं वाक्यं 'तत्त्वमसि' इति सिद्धम्"[५६] इति। विकारशब्देनात्र नित्यशुद्धात्मतत्त्वव्यतिरिक्तं सर्वं विवक्षितम्। तच्च आविद्यकम् प्रपञ्चजातं कार्यकारणरूपम्। तद्वांश्च त्र्यवस्थाभिमानी जीवः। स च त्वम्पदार्थः। तस्य चाविद्यकजीवात्मत्वविज्ञाननिवृत्तिः निवृत्तनिखिलोपाधिकात्मस्वरूपावगत्या। तस्मात् तदेव स्वरूपं त्वम्पदार्थम् उद्दिश्य विधेयं श्रुत्या। अतो निवृत्तनिखिलोपाधिकम् आत्मस्वरूपं तत्पदार्थः। तदवगत्यै विकारानृताधिकृतजीवात्मविज्ञाननिवृत्तिरिति वाक्यार्थविचारे भागत्यागलक्षणा केवलं त्वम्पदेऽङ्गीकार्या।

### ५.२. ऐतरेयभाष्यसङ्गतिः

अपि चैतरेयोपनिषदः चतुर्थखण्डारम्भे भाष्यभूमिकान्ते भगवत्पादाः प्राहुः– "कथं तर्हि तस्य स म आत्मेति वेदनम्,...'तत्त्वमसि', 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्येवमाद्यपि च।"[५७]

अत्र भाष्यकारभगवत्पादा उपनिषत्प्रसिद्धां तत्त्वप्रबोधनप्रक्रियामनुवदन्ति। तथा ह्यात्मस्वरूपविषयिणीं जिज्ञासामनु श्रुत्या अध्यारोपापवादाभ्यां तत्त्वम् बोध्यते। क्वचिदध्यारोपापवादन्यायेन प्रथममेव तत्त्वम् प्रतिपाद्य ततस्तदात्मेत्युपदिश्यते। श्रूयते च ऐतरेयस्य तृतीयाध्याये केन-काठकादिश्रुतिषु च आत्मविषयिणीं जिज्ञासामनु ब्रह्म बोधितम्।

---

[५६] श्रीशाङ्करग्रन्थावलिः, भागः ९ (छान्दोग्योपनिषद्भाष्यम्), पृष्ठसङ्ख्या ४१२

[५७] श्रीशाङ्करग्रन्थावलिः, भागः ८ (उपनिषद्भाष्याणि), पृष्ठसङ्ख्या ५८५

पूर्वस्मिन् वेदभागे जातां कर्मोपासनावाक्यविस्तरपरिसमाप्तिमेवावलम्ब्य वा एकविज्ञानेन सर्वविज्ञानमित्यादिन्यायमुखेन वा यत्र पुनरुपनिषदि परमपुरुषार्थमुद्दिश्य विचारः समारब्धः तत्र तु ब्रह्म समुपदिश्यानन्तरं तदात्मेति विज्ञापितम्। ऐतरेयस्य प्रथमाध्याये छन्दोगानामुपनिषदः षष्ठाध्याये मुण्डकश्रुतौ च रीतिरेषा दृष्टा। माण्डूक्यश्रुतिरप्यादौ ब्रह्म प्रतिज्ञाय ततोऽयमात्मैव ब्रह्मेत्युपदिश्य एतद्विज्ञानस्य तत्त्वत उपलब्ध्यै त्र्यवस्थस्यात्मनः स्वरूपनिर्णयाय प्रणवमालम्बनं कृत्वा प्रवर्तते। एवं ज्ञापितमपि ब्रह्म अपरोक्षानुभवेन अगृहीतवद्भ्यः श्रुतिः स्पष्टं जीवपरयोरैक्यप्रतिपादकं तत्त्वमस्यादिवाक्यमुपदिशति। दर्शितञ्चात्र[५८] यच्छान्दोग्ये तत्त्वमसीत्युक्तेः पूर्वमेव 'स आत्मा' इत्यन्तैरपवादवाक्यैः निर्गुणम् ब्रह्म प्रत्यगात्मस्वरूपमुपदिष्टमिति। तथाप्यत्रोद्धृते ऐतरेयभाष्यांशे भाष्यकारैरुपदर्शितो यो मन्दाधिकारी, कृतेऽपि बोधने 'भवान् मां बोधयितुं प्रवृत्तः तूष्णीं बभूव, किं न बोधयति' इत्येवं यः पुनर्जिज्ञासते, तादृशस्य श्रोतुः स्पष्टावबोधार्थम् भगवती श्रुतिरभिनयेन तत्त्वमसीति पुनः पुनराह दृष्टान्तोपन्यासपुरस्सरम्। तस्मादध्यारोपापवादाभ्यामात्मस्वरूपबोधनस्य प्रक्रियैव तत्त्वमसीति वाक्येऽनुसरणीया, वाक्यस्यास्य तत्प्रक्रियासङ्ग्रहरूपत्वात्। अस्माद् हेतोः तत्पदार्थोऽध्यारोपापवादाभ्यामवधारितम् ब्रह्मैव। तदेव त्वमित्युक्ते सति त्वम्पदेनोक्त आत्मा तर्ह्येतावत्कालं कर्तृत्वभोक्तृत्वाद्युपाधिमानिति मिथ्यैव मम धारणाऽऽसीदिति निर्णीय स्वाविद्यकोपाधिसर्वस्वमपनीय तद्ब्रह्मैवाहमस्मीत्यवगच्छति पण्डितः। अन्यस्तु मुग्धः 'भवान् मां बोधयितुं प्रवृत्तः तूष्णीं बभूव, किं न बोधयति' इत्येवं किमपि पुनरपि पृच्छेत्।

**५.३. दहराधिकरणभाष्यसङ्गतिः**

अपि च दहराधिकरणे[५९] "अथ यदिदमस्मिन् ब्रह्मपुरे दहरम् पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश..."[६०] इति विषयवाक्ये श्रुतो दहराकाशः परम् ब्रह्मैव, न तु जीव इति द्रढयन्तो भाष्यकारभगवत्पूज्यपादाः "उत्तराच्चेदाविर्भूतस्वरूपस्तु"[६१] इति सूत्रस्य भाष्ये एवमाहुः– "नोत्तरस्मादपि वाक्यादिह जीवाशङ्का सम्भवतीत्यर्थः... किं तर्हि तद्यत्सत्यं स आत्मा

[५८] अत्रैव (४.१.), "ननु छान्दोग्योपनिषदि सद्ब्रह्मणः...." इत्यादि द्रष्टव्यम्।

[५९] ब्रह्मसूत्रम् १.३.१४-२१

[६०] छान्दोग्योपनिषत् ८.१.१

[६१] ब्रह्मसूत्रम् १.३.१९

चैतन्यमात्रस्वरूपः तत् त्वमसीति...'स यो ह वै तत्परमम् ब्रह्म वेद ब्रह्मैव भवति' (मुण्डकोपनिषत् ३.२.९) इत्यादिश्रुतिभ्यः।" [६२] इति।

## ५.४. भामतीवाक्यसङ्गतिः

किञ्च भामतीकारा अपि वेदान्तस्येदृशीमेव तत्त्वप्रबोधनशैलीमनुसृत्य तत्पदार्थमुपाधिरहितं चैतन्यमङ्गीकुर्वन्ति। तद्यथा अध्यासभाष्यान्ते "यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायाम् प्रदर्शयिष्यामः" [६३] इति भाष्यवाक्यस्य भामती "शरीरमेव शरीरकं, तत्र निवासी शारीरको जीवात्मा, तस्य त्वम्पदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपतामीमांसा या सा तथोक्ता" [६४] इति। किञ्च "अथातो ब्रह्मजिज्ञासा" [६५] इति सूत्रे "नन्विह कर्मावबोधानन्तर्यं विशेषः" [६६] इति भाष्यांशस्य व्याख्यानावसरे भामती– "...तत्त्वमसीतिवाक्यात् त्वम्पदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मना ऐक्यम् अशक्यं द्रागित्येव प्रतिपत्तुम्..." [६७] इत्यादिः। तत्रैव किञ्चिदनन्तरम् पुनः "तस्मात् निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितम् अन्तःकरणं त्वम्पदार्थस्य अपरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थताम् अनुभावयतीति युक्तम्" [६८] इति च।

## ६. उपसंहारः

एवञ्च श्रुतिविरोध-कल्पनागौरव-भाष्यविरोधरूपाः त्रयो दोषाः सम्प्रदायप्रसिद्धायां तत्त्वमसिवाक्यविचारप्रक्रियायां सम्भाव्यमानाः शास्त्राचार्योपदेशसङ्गतिमति प्रक्रियान्तरेऽस्मिन् न सम्भवन्तीति स्फुटम्। तस्मादियमेव प्रक्रिया साधीयसी इति पूर्वाचार्यैर्दर्शिताम् प्रसिद्धाम् प्रक्रियाम् प्रति कश्चन पूर्वपक्षः।

अत्र तत्त्वमसिवाक्याद् वेदान्तविषयभूतात्माद्वैतार्थस्य बोधप्रकारे कासाञ्चिच्छङ्कानां निवृत्तिमभिलष्य अयम् पूर्वपक्षो भाष्यवचनानाम्

---

[६२] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) ३.३.१९, पृष्ठसङ्ख्या २३३

[६३] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) १.१.१, अध्यासभाष्यम्, पृष्ठसङ्ख्या २६

[६४] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) १.१.१, भाष्यमधि भामती, पृष्ठसङ्ख्या २६

[६५] ब्रह्मसूत्रम् १.१.१

[६६] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) १.१.१, पृष्ठसङ्ख्या २९

[६७] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) १.१.१, भाष्यमधि भामती, पृष्ठसङ्ख्या ३०

[६८] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीलाल् बनारसीदास्) १.१.१, भाष्यमधि भामती, पृष्ठसङ्ख्या ३१

परिशीलनेन तदनुगुणं वैयासिकन्यायचिन्तया चात्र परिकल्पितः। पक्षस्यास्य पोषणन्तु संशयानां स्पष्टप्रतिपादनमुद्दिश्य विहितं, न तु तत्र निश्चयोत्पादनाय। यस्मादेवं तस्माद् वेदान्तसम्प्रदाये श्रद्धावद्भिरद्वैतविद्भिः अत्रोत्थापितानां संशयानां युक्तियुक्तं निवारणम्, पूर्वाचार्यैराश्रितायाः प्रक्रियायाः स्पष्टतरमुपस्थापनञ्च क्रियते चेत् तदस्माकम् अनुग्राहकमेव भवेदिति शिवम्॥

## परिशीलितग्रन्थसूची


१. *अद्वैतसिद्धिः* (*बालबोधिनीसहिता* (रत्नभारती ग्रन्थमाला - १२); वाराणसी– रत्ना पब्लिकेशन्स्।

२. *नैष्कर्म्यसिद्धिः भावतत्त्वप्रकाशिकोपेता* (श्रीदक्षिणामूर्तिसंस्कृतग्रन्थमाला १५); वाराणसी– श्रीदक्षिणामूर्तिमठः।

३. *पञ्चीकरणम्* (अद्वैतग्रन्थरत्नमञ्जूषायाः १८ रत्नम् ); वाराणसी– महेश अनुसन्धान संस्थानम्।

४. *ब्रह्मसूत्रशाङ्करभाष्यम्*; आचार्यजगदीशशास्त्री (सम्पादकः); मोतिलाल् बनारसीदास्।

५. *वेदान्तपरिभाषा* (हरिदाससंस्कृतग्रन्थमाला-६); वाराणसी– चौखम्बा संस्कृत सीरिज् आफिस्।

६. *वेदान्तसारः* (Krishnadas Sanskrit Series – 166); वाराणसी– कृष्णदास अकादमी।

७. *व्याससूत्रेन्दुशेखरः* ; जगतगंज, वाराणसी– शारदासंस्कृतसंस्थानम्।

८. *श्रीशङ्करग्रन्थावलिः* ; (Complete Works of Sri Sankaracharya in 10 Volumes); चेन्नैनगरी– समताबुक्स्।

9. *Preceptors of Advaita*; Chennai– Samata Books.


✶✶✶

# “अन्यदेव तद्विदितादथो अविदितादधि” : केनोपनिषन्मन्त्रस्यास्य द्वैताद्वैतविशिष्टाद्वैतभाष्यमाश्रित्य अध्ययनम्

**पलाश-घोडइः** *

## भूमिका

वेदान्तदर्शने प्रसिद्धे प्रस्थानत्रिके श्रुतिप्रस्थानं नाम अभ्यर्हिततमं यत्र उपनिषदाम् अन्तर्भावः। प्रसिद्धासु दशसु एकादशसु वोपनिषत्सु लघ्वी अपि केनोपनिषद् विषयगाम्भीर्येण तत्त्वप्रतिपादनकौशलेन च नावीन्यं बिभ्रन्ती विपश्चितां चेतःसु चिराय स्थानम् अधिकृतवती। यथार्थतयैव केनोपनिषदि तत्त्वप्रतिपादनकौशलम् अतिविचित्रम् आश्चर्यजनकं रहस्यमयं च, येन प्राचीनकालादारभ्य इदानीन्तनकालावधि बहवो विद्वांस उपनिषदमिमामाश्रित्य स्वकीयं विचारं मतं वा समुपन्यस्तवन्तः। सर्वासाम् उपनिषदामिव अस्या अप्युपनिषदः प्रतिपाद्यभूतं तावत् ब्रह्मतत्त्वमेव। परन्तु कीदृशं तद् ब्रह्मतत्त्वम् इत्येतस्मिन् विषये मतानैक्यं विद्यते विद्वत्सु। तदेव ब्रह्मतत्त्वं केनोपनिषत्प्रतिपादितम् अत्र पर्यालोचयिष्यते।

**केनोपनिषदः तद्भाष्याणां भाष्यकाराणां च परिचयः**

सामवेदीया हीयम् उपनिषत् तलवकारशाखायाम् अन्तर्भवति। “केनेषितम्” इति मन्त्रेण आरभ्यमाणाया अस्या उपनिषदः “केन” इति प्रथमपदग्रहणेन अस्याः उपनिषदः केनोपनिषदिति नाम। किञ्च, इयं तलवकारोपनिषदिति तलवकारब्राह्मणोपनिषदिति च नाम्नापि व्यवह्रियते। अस्याम् उपनिषदि चत्वारः खण्डाः विलसन्ति। तत्र प्रथमे खण्डे अष्टौ, द्वितीये पञ्च, तृतीये द्वादश, चतुर्थे च नव मन्त्राः इति साकल्येन चतुस्त्रिंशत् (३४) मन्त्राः विद्यन्ते। प्रथमद्वितीयखण्डौ पद्यात्मकमन्त्रसमृद्धौ, तृतीयचतुर्थखण्डौ तु गद्यात्मकमन्त्रयुतौ। आत्मविद्या अथवा ब्रह्मविद्या एव सर्वासाम् उपनिषदां प्रतिपाद्यभूतेति पारम्परिकाणाम् आधुनिकानां च सर्वेषां विदुषां निश्चितो राद्धान्तः। परन्तु प्रत्येकम् उपनिषदाम् आत्मतत्त्वप्रतिपादनशैली भिन्नैव। यथा ईशोपनिषद् ईश्वरजगतोः समन्वयं साधयन्ती आत्मतत्त्वं प्रतिपादयति,

---

* सहायकाध्यापकः, संस्कृतविभागस्य, राजा-नरेन्द्रलाल-खान-महिला-महाविद्यालयस्य, मेदिनीपुरस्थस्य

केनोपनिषत्तु केनचित् भिन्नेन मार्गेण ब्रह्मतत्त्वं प्रतिपादयति। मनःप्राणादयो येन प्रेरिताः सन्तः स्वकार्याणि सम्पादयन्ति, यच्च मनःप्राणादीनाम् अगम्यं तद् ब्रह्मेति केनोपनिषदां प्रथमखण्डे सामान्यतः प्रतिपाद्यते।

प्राचीनतमात् शङ्कराचार्यस्य भाष्यादारभ्य इदानीन्तनकालपर्यन्तं केनोपनिषदो बहूनि भाष्याणि बहुभिः विद्वद्भिः विरचितानि। केनोपनिषदो भाष्यकारेषु आदिमतमस्य शङ्कराचार्यस्य पदभाष्यं वाक्यभाष्यं चेति भाष्यद्वयं सम्प्रदायपरम्परायां प्रसिद्धम्।[२] शङ्कराचार्यस्य अद्वैतवेदान्तसम्मतं केनोपनिषद्भाष्यद्वयमाश्रित्य परवर्तिकालिना बहवो विद्वांसः अस्या उपनिषदः संस्कृतभाषया हिन्दी-बङ्ग-आङ्गलादिभिः भाषान्तरैश्च अर्थनिर्णयाय प्रवर्तितवन्तः। तेषु विद्वत्सु स्वामिदयानन्दसरस्वती-राधाकृष्णन्-शर्वानन्द-चिन्मयानन्द-शिवानन्द-ब्रह्मचारिमेधाचैतन्य-जुष्टानन्द-प्रभृतयः अन्यतमाः। किञ्च, अस्याः उपनिषदः विशिष्टाद्वैतसम्मतं द्वैतवेदान्तसम्मतं भाष्यमपि विद्यते। विशिष्टाद्वैतिनः रामानुजाचार्यस्य एतदुपनिषद्भाष्यं नास्ति। परन्तु तदनुयायिनः रङ्गरामानुजमुनेः एतदुपनिषद्भाष्यमुपलभ्यते। परवर्तिकालिकः एस्. एम्. श्रीनिवासाचारिमहोदयः प्रत्येकम् उपनिषदाम् अर्थनिर्णयप्रसङ्गे रङ्गरामानुजस्वीकृतस्य विशिष्टाद्वैतवेदान्तसम्मतस्य अर्थस्य युक्तत्वं दर्शयितुं प्रयत्नं चकार। द्वैतवेदान्ती मध्वाचार्यस्तु ब्रह्मसारग्रन्थात् कांश्चन श्लोकान् उद्धृतवान्, तदेव तस्य तलवकरोपनिषद्भाष्यमिति प्रसिद्धिः। तदीये भाष्ये केनोपनिषदो मन्त्रशः अर्था न सन्ति, अपि तु खण्डशः अर्थाः सन्ति। पुनश्च तत्र सर्वेषां मन्त्राणाम् अर्था न सन्ति। किञ्च, कस्य मन्त्रस्य कः अर्थ इत्यपि न विज्ञायते। मध्वाचार्यस्य भाष्यम् अवलम्ब्य तत्सम्प्रदायानुयायिनः केचन टीका-टिप्पण्यादिकं रचितवन्तः। तेषु व्यासतीर्थविरचितं विवरणम्, वादिराजयतिविरचिता प्रकाशिका, वेदेशतीर्थविरचितं विवरणम्, राघवेन्द्रयतिविरचितः तलवकारोपनिषत्खण्डार्थः, वरदतीर्थविरचिता टीका च प्रसिद्धिं गताः। एतानि सम्प्रदायसम्मतानि व्याख्यानानि विहाय

---

२ किमर्थं शङ्कराचार्यः केनोपनिषदः भाष्यद्वयं विरचितवान् एतद्विषये सम्यक् तथ्यं नोपलभ्यते। एतद्भाष्यद्वयं शङ्कराचार्यकृतं न वेति विषये अनेकेषां विदुषां संशयो वर्तते। अप्रासङ्गिकत्वाद् अयं विषयो नात्र आलोच्यते। जिज्ञासवः पाठकाः कृपया पश्यन्तु– Sengaku Mayeda. (1967). "On Śaṅkara's Authorship of the Kenopaniṣadbhāṣya", Indo-Iranian Journal, 10.1, pp. 33-55. (१९१९) केनोपनिषत्– श्रीमच्छङ्कराचार्यकृतपदवाक्यभाष्याभ्यां तथा श्रीरङ्गरामानुजकृतप्रकाशिकया च समेता, पृ. ८-१२.

अनेकैराधुनिकैर्विद्वद्भिः स्वतन्त्रतया इयमुपनिषद् अनुदिता, कैश्चिच्च अस्या उपनिषदो भाष्यमपि विरचितम्। अनुवादकेषु म्याक्समूलर्, पल्-डयसन्, हान्स्-ओर्टल, स्वार्ट्-हिउम्, पत्रिक्-अलिभेले इत्येते विद्वांसः अन्यतमाः। एते यद्यपि विस्तृतं भाष्यं न विरचितवन्तः, अपि तु केनोपनिषन्मन्त्राणाम् अनुवादं कृतवन्तः, तथापि स्थाने स्थाने क्वचित् तेषां स्वकीयमतं प्रकाशयन्त्य उक्तयः अवलोक्यन्ते याश्च केनोपनिषदर्थनिर्णये महद् उपकुर्वन्ति। पारम्परिकान् आचार्यान् विहाय ये विद्वांसः केनोपनिषदः अर्थनिर्णयाय स्वतन्त्रं भाष्यं व्याख्यानं वा विरचितवन्तस्तेषु श्रीअरविन्दः, अनिर्वाणः, आर. डि. रानाडे, सिनिय-कोहेन् इत्येते अन्यतमाः। एतेषु श्रीअरविन्दः, अनिर्वाणश्च केनोपनिषदमाश्रित्य विस्तृतं भाष्यं रचयामासुः। अन्ये विद्वांसस्तु श्रीअरविन्दव्याख्यानवत् विस्तृतं व्याख्यानं न विरचितवन्तः, परन्तु उपनिषदम् इमामाश्रित्य ते स्वकीयं विचारपूर्णं मतं स्वग्रन्थेषु निगदितवन्तः।

## केनोपनिषत्प्रतिपादितं ब्रह्मतत्त्वम्

केनोपनिषदः आदिमे मन्त्रे एव तत्त्वजिज्ञासुना शिष्येण पृच्छ्यते यत् केन देवेन प्रेरितानि सन्ति मनः, प्राणः, वाक्, चक्षुः, श्रोत्रं च स्वकर्मसु प्रवर्तन्ते इति। एतस्यैव प्रश्नस्योत्तररूपेण खण्डस्यास्यावशिष्टा मन्त्रा आम्नायन्ते। तत्र द्वितीये मन्त्रे उत्तररूपेण निगद्यते यत् तद्धि तत्त्वं श्रोत्रस्य श्रोत्रं मनसश्च मन इति। तथाहि मन्त्रः -

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति॥

(केनोपनिषत् १.२) इति।

सर्वैरपि व्याख्याकारैः मनःप्राणेन्द्रियाणां प्रेरकत्वेन परमं तत्त्वमेव उररीकृतम्, यत्तत्त्वविज्ञानेन संसारबन्धात् विमुच्य धीरा अमृतत्वपदवीम् अधिगच्छन्ति। तत्परमतत्त्वम् अस्याम् उपनिषदि ‘ब्रह्म’-इति नाम्ना एव निर्दिश्यते इति अनन्तरमन्त्रेषु उल्लिख्यते। एवं द्वितीये मन्त्रे श्रोत्रस्य श्रोत्रमित्यादिना यत्तत्त्वं बोधयितुम् इष्टं तदेव तत्त्वं पुनस्तृतीयादिषु मन्त्रेषु विस्तरेण प्रतिपाद्यते। तथाहि तृतीयो मन्त्रः -

न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनो
न विद्मो न विजानीमो यथैतदनुशिष्यात्।
अन्यदेव तद्विदितादथो अविदितादधि
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे॥ (केनोपनिषत् १.३) इति।

शङ्कराचार्यमते मन्त्रस्यास्यार्थो हि– यस्मात् श्रोत्राद्यात्मभूतं ब्रह्म अतस्तस्मिन्ब्रह्मणि चक्षुर्न गच्छति, स्वात्मनि गमनासम्भवात्। एवं वाग् न गच्छति। मनः अन्यस्य वस्तुनः सङ्कल्पयितृ अध्यवसायितृ च सत् न आत्मानं सङ्कल्पयति, अध्यवस्यति च। एवम् इन्द्रियमनोगोचराभावात् ईदृशं ब्रह्म इति न जानीमः, तस्मादेव कारणाद् न विजानीमः येन प्रकारेण एतद्ब्रह्म शिष्याय उपदिशेत्। ननु किमर्थं ब्रह्म उपदेष्टुं न शक्यमिति चेदुच्यते– "यद्धि करणगोचरं तदन्यस्मा उपदेष्टुं शक्यं जातिगुणक्रियाविशेषणैः। न तज्जात्यादिविशेषणवद्ब्रह्म" इति।[३] अर्थात् अत्र मनआदीनां प्रवर्तकत्वेन निर्गुणब्रह्मणः निर्देशात्, तस्य च मनइन्द्रियादिभिः वेत्तुम् अशक्यत्वात् न तज्ज्ञायते, शिष्योपदेशप्रकारश्च न विज्ञायते इत्यर्थः। परन्तु आगमप्रमाणेन तज्ज्ञायते। कीदृशं तद् इति चेदुच्यते विदिताद् विदिक्रियाकर्मभूतात् व्याकृतात् अन्यत्। अपि च, अविदितात् विदितविपरीतात् अव्याकृताद् अविद्यालक्षणात् व्याकृतबीजात् अधि उपरि अन्यदित्यर्थः। एवं "सर्वविशेषरहितस्य" ब्रह्मणः आचार्योपदेशपरम्परायां प्राप्तत्वमुच्यते– इति आचार्योपदेशपरम्परयैवाधिगन्तव्यं ब्रह्म न तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभ्यश्च इत्येवं वयं पूर्वेषामाचार्याणां वचनं श्रुतवन्तः, ये आचार्याः अस्मभ्यं तद्ब्रह्म व्याख्यातवन्तः विस्पष्टं कथितवन्तः इति शङ्कराचार्यस्य पदभाष्यगतं व्याख्यानम्।[४]

विशिष्टाद्वैतिनः रङ्गरामानुजस्य प्रकाशिकायां तृतीयमन्त्रस्य पृथग् भाष्यं नास्ति, द्वितीयमन्त्रेण सहैव तस्य उल्लेखः दृश्यते। किञ्च, तत्र तृतीयमन्त्रस्थपदानाम् उल्लेखः अपि नास्ति। परन्तु रङ्गरामानुजाचार्यस्य भाष्यम् अनुसरता अनन्त-रङ्गाचार्येण सम्पादिते अनुदिते च ग्रन्थे मन्त्रस्यास्य विशिष्टाद्वैतसम्मतं भाष्यमुपलभ्यते। श्रीनिवासाचारिमहोदयोऽपि स्वग्रन्थे अंशतः तृतीयमन्त्रस्य विशिष्टाद्वैतसम्मतं भाष्यमाह ।[५] तथाहि अनन्तरङ्गाचार्यस्य अनुवादानुसारेण मन्त्रस्यास्यार्थो हि– चक्षुरादीनि तत्र न गच्छन्ति। वयं तद् ब्रह्म सम्पूर्णतः न जानीमः, न च उपदेष्टुं शक्नुमः। किमर्थमिति चेद् बाह्याभ्यन्तरेन्द्रियैः ज्ञातुमशक्यत्वात्। तच्च ब्रह्म सर्वात्मना

---

३ श्रीशङ्करभगवत्पादाचार्यविरचितम् उपनिषद्भाष्यम्, खण्डः १, पृ. २१-२२

४ श्रीशङ्करभगवत्पादाचार्यविरचितम् उपनिषद्भाष्यम्, खण्डः १, पृ. २१-२२

५ श्रीनिवासचारिनोक्तम्– "Ramanuja takes them [vidita and avidita] to mean what is well-known and whta is totally unknown respectively." पश्यतु S. M. Srinivasa Chari, The Philosophy of the Upaniṣads, p. 176.

विदितादपि विलक्षणं, सर्वात्मना अविदितादपि विलक्षणम्। एवं रूपं ब्रह्म इति ईदृशीं वाचं वयं श्रुतवन्तः इति।[६] रामानुजमते विदितशब्दार्थः उत्तमतया ज्ञातम् (well-known), अविदितशब्दार्थो हि सम्पूर्णतः अज्ञातम् (totally unknown)। अर्थात् अस्मिन् मन्त्रे मनआदीनां प्रेरकत्वेन अभिप्रेतं ब्रह्म न उत्तमतया ज्ञातं भवति, न च सम्पूर्णतः अज्ञातमपि भवतीति विशिष्टाद्वैतसम्मतं व्याख्यानम्।

मध्वाचार्यानुयायिनः वेदेशतीर्थस्य मते मन्त्रार्थो हि– चक्षुरादीनाम् अभिमानिनः सूर्यादयो देवाः नारायणविषये न गच्छन्ति न जानन्ति। चक्षुरादिदेवानाम् उपलक्षणत्वात् सर्वेऽपि देवाः नारायणविषये न पूर्णतः जानन्ति इत्यर्थः अवगन्तव्यः। मध्वाचार्येण भाष्ये उच्यते– "अगम्यः सर्वदेवैश्च परिपूर्णत्वहेतुतः" इति।[७] अर्थात् ब्रह्मणः परिपूर्णत्वात् सर्वेऽपि देवाः तत्स्वरूपं पूर्णतः न जानन्ति। एतत् नारायणस्वरूपं यथावत् अनुशिष्याद् अनुशिष्याम् युष्मदादिषु उपदेशं कुर्यां तथा न विद्मः। किमर्थम्? अनुपमत्वेन सादृश्याभावात्। यथा लोके जन इदं गवयादिकं वस्तु एतद् गवादिसदृशमिति अनुशिष्यात् जानीयात् तथा परमात्माख्यं वस्तु एतत्सदृशमिति वयं न विद्मः। न विद्मो न विजानीमः इति द्विरुक्तिः सामान्यविशेषज्ञाननिषेधार्थं वा परोक्षापरोक्षज्ञाननिषेधार्थं वा आदरार्थं वा। तत् परं ब्रह्म विदिताद् व्यक्तात् कार्यात् विलक्षणमेव नतु तत्सदृशम्। किञ्च , तद् अविदितात् प्रकृत्यादिकारणादपि अन्यदेव। तच्च परं ब्रह्म विदितादविदिताच्च सर्वस्माद् अधिकत्वेन वर्तमानात् सर्वोत्तमः। विदिताविदिताभ्यां विलक्षणत्वोक्त्या ब्रह्मणः अनुपमत्वं सर्वोत्तमत्वं च अवगन्तव्यम्। इदं च न स्वकपोलकल्पितमपि तु ये व्यासादयो अस्मभ्यं तद् ब्रह्मस्वरूपं व्याख्यातवन्तस्तेषां वचनं शुश्रुमः इत्यर्थः।[८] राघवेन्द्रयतिमते

---

[६] "The eye does not reach there. nor the speech nor the mind. We do not know (Brahman fully as such). We are not aware how it can be taught (as it cannot be known by external or internal sense organ)." & "That is distinct from what is very well known and again it is distinct from what is totally unknown. We have heard thus from the ancient teachers who taught us this truth clearly." □□□□□□, Principal Upanishads (Vol. 1). N. S. Anantha Rangacharya (trans. & ed.). p. 21-22.

[७] श्रीमदानन्दतीर्थभगवत्पादाचार्य-प्रणीतभाष्यभूषिता ईशावास्योपनिषत् तथा तलवकारोपनिषत् : टीका-टिप्पणी-खण्डार्थसंवलिता, पृ. १९०।

[८] तदेव, पृ. १९७-९८।

विदितात् प्रमिताज्जगतः, अविदिताद् अप्रमितात् शशश‍ृङ्गादेश्च विलक्षणं ब्रह्म इत्यर्थः।[९] वासुमहोदयः मन्त्रस्यास्य व्याख्याने राघवेन्द्रयतिमेव अनुसृतवान्।[१०]

सम्प्रदायत्रयव्याख्यानेभ्यः इदं स्पष्टं यत् मन्त्रस्यास्य प्रथमपादव्याख्याने यद्यपि ते तावत् मतानैक्यं न प्रदर्शयन्ति तथापि द्वितीयतृतीयचतुर्थपादान् तु सर्वथैव भिन्नतया व्याख्यातवन्तः। "न विद्मो न विजानीमो यथैतदनुशिष्यात्" इत्यत्र ज्ञानार्थकस्य विद्धातोः ज्ञाधातोश्च द्वयोरपि प्रयोगो विद्यते। एकेनैव पदेन ज्ञानार्थकत्वे बोधिते द्विरुक्तिः किमर्था इत्यस्मिन् विषये मध्वाचार्यस्य द्वैतमतं व्याख्याता वेदेशतीर्थेनोच्यते– न विद्मो न विजानीमः इति द्विरुक्तिः सामान्यविशेषज्ञाननिषेधार्थं वा परोक्षापरोक्षज्ञाननिषेधार्थं वा आदरार्थं वा। बि. डि. वासुमहोदयेन मन्त्रार्थनिर्णयप्रसङ्गे उच्यते यत्– विद्मः इत्यस्य जानीमः "know" इति, विजानीमः इत्यस्य च अवगच्छामः "understand" इत्यर्थः।[११] अयमर्थः म्याक्समूलर्-महोदयेनापि स्वीकृतः।[१२] शङ्करभगवत्पादेन विद्-धातोः कर्मत्वेन ब्रह्म स्वीकृत्य इन्द्रियमनोगोचराभावात् ब्रह्मस्वरूपं न जानीमः इति प्रथमवाक्यार्थः स्वीकृतः; किञ्च, इन्द्रियमनोगोचराभावात् तद् अतीन्द्रियं ब्रह्म शिष्याय कथम् उपदेष्टुं शक्यते तदपि न विजानीमः इति द्वितीयवाक्यार्थः स्वीकृतः। एवं वाक्यार्थभेदे सति न द्विरुक्तिः तन्मते सङ्गच्छते। श्रीअरविन्देन तु विद्मः इत्यस्य सामान्यतः ज्ञानम्, विजानीम इत्यस्य पूर्णतः ज्ञानम् इति पदद्वयार्थः स्वीकृतः। तथाहि तेनोच्यते - "The two Sanskrit words that are here

---

९ तदेव, पृ. २०१।

१० तस्य नारायणस्य स्वरूपम् उपदेष्टुं न शक्यते कस्मैचिदित्यर्थोऽपि वासुमहोदयेन टिप्पणीमध्ये स्वीकृतः। तथाहि तेनोच्यते– "I do not know how to import properly any instruction about Him, and His essential nature, to to you, O Śiva, and to others like you." किञ्च, अविदितपदस्य कल्पितार्थोऽपि तेन स्वीकृतः। तथाहि– "The Deva of eye cannot fully enter into the majesty of That Hari, nor the deva of speech, not the mind. We do not know nor understand how He may be governing all this. He is indeed more wonderful than all that can be known or all that can be immagined. He is the Best. Thus have we heard from the Teachers of old who taught Him to us." पश्यतु– The Sacred Books of the Hindus. p. 24.

११ The Sacred Books of the Hindus. p. 24.

१२ "We do not know, we do not unerstand, how any one can teach it." पश्यतु– The Sacred Books of the East (Vol 1). p. 147.

used, vidmaḥ and vijānīmaḥ, seem to indicate the one a general grasp and possession in knowlege, the other a total and exact comprehension in whole and detail, by synthesis and alalysis.” [१३] स्वामिदयानन्दसरस्वती तु न विद्मः इत्यस्य विषयत्वेन ब्रह्म न जानीमः इत्यर्थं स्वीचकार। [१४]

किञ्च, अनुशिष्यादिति पदस्य प्रेरयेत् इति, एतदिति पदस्य च प्राणादिजगत् इत्यर्थं स्वीकृत्य राघवेन्द्रयतिः मन्त्रस्य द्वितीयपादस्य विष्णुः केन प्रकारेण एतत् प्राणादिजगत्सर्वं प्रेरयेदिति न ज्ञायते इत्यर्थं स्वीकृतवान्। राघवेन्द्रयतिं विहाय अन्ये सर्वे आचार्यास्तु अनुशिष्यादिति पदस्य उपदिशेत् इति एतत् इति पदेन च श्रोत्रादीनां श्रोत्रभूतं ब्रह्म इत्यर्थं स्वीकृत्य मन्त्रांशस्यास्य केन प्रकारेण तद् ब्रह्म उपदेष्टुं शक्येत इति न विज्ञायते इत्यर्थं स्वीकृतवन्तः। शासु अनुशिष्टौ इति धातुपाठात् अनुशासनार्थे नाम उपदेशार्थे एव शास्-धातोः प्रयोगो दृश्यते। तैत्तिरीयोपनिषद्यपि– “वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति” [तैत्तिरीयोपनिषत्, शीक्षावल्ली– ११] इत्यत्र अनुशास्ति नाम उपदिशति इति। अत एव धात्वर्थदृष्ट्या प्रेरणरूपार्थः अत्र न सङ्गच्छते। ननु केनेषितमित्यादिना मन्त्रेण प्राणादीनां प्रेरकत्वविषये प्रश्नः श्रूयते इत्यतः प्रसङ्गवशात् अत्र अनुशिष्यादिति पदस्य प्रेरयेदित्यर्थः युक्तताम् अर्हेत् इति चेन्न, प्रसङ्गवशात् धात्वर्थसम्बन्धव्यतिरेकेणैव पदस्यार्थस्वीकारे प्रसङ्गवशात् यस्य कस्यापि पदस्य यः कश्चिदर्थः ग्रहीतुं शक्यते इति महान् अनर्थः सम्भवेत्। अतः प्रसङ्गमनुसृत्यापि पदार्थसम्बन्धः अवश्यमेव अभ्युपगन्तव्यः। तस्मात् अनुशिष्यादिति पदस्य प्रायःसर्वभाष्यकारस्वीकृतः उपदिशेदित्यर्थः एवात्र मन्मते समीचीनः, न तु प्रेरयेदित्यर्थः। किञ्च, धातूनाम् अनेकार्थत्वात् प्रसङ्गतो मनआदीनां प्रेरकः कः इति प्रेरकविषयकप्रश्नसामर्थ्याच्च अनुशिष्यात् इति पदस्य प्रेरयेदित्यर्थः कथञ्चित् युक्तताम् अर्हेत् येन राघवेन्द्रयतिस्वीकृतः अर्थः कथञ्चित् सङ्गतो भवेत्, परन्तु तादृशार्थः कष्टकल्पितत्वेन अप्रसिद्धः स्यात्।

“अन्यदेव तद्विदितादथो अविदितादधि” इति तृतीयपादः मन्त्रेऽस्मिन् अतीव विशिष्टः। विदिताविदितशब्दार्थविषये भाष्यकाराणां मतभेदः विद्यते। तथाहि शङ्कराचार्येण विदितशब्दस्य व्यक्तं[जगत्] अविदितशब्दस्य

---

[१३] Sri Aurobindo, The Upanishads II, Kena and Other Upanishads, p. 43.

[१४] “We do not recognise it as an object”. पश्यतु– Swami Dayananda Saraswati, p. 64.

च अविद्यालक्षणम् अव्यक्तम् [जगत्कारणम्] इत्यर्थं स्वीकृत्य ताभ्याम् अन्यत् निर्विशेषं ब्रह्म अत्र प्रतिपिपादयिषितमिति निगदितम्। शङ्कराचार्यस्य अद्वैतमतम् अनुसरद्भिः अनेकेषां विदुषां मते ब्रह्मणः ज्ञानाविषयत्वात् तत् विदितात् अन्यदिति उच्यते। जगति सर्वं वस्तु ज्ञानस्य विषयः भवति, परन्तु निर्विशेषं ब्रह्म कदापि ज्ञानक्रियाविषयं न भवति इत्यतः ब्रह्म विदिताद् अन्यत्।[१५] रामानुजस्य विशिष्टाद्वैतमते विदितशब्दार्थः उत्तमतया ज्ञातम् अविदितशब्दार्थो हि सम्पूर्णतः अज्ञातम्। अतः तन्मते ब्रह्म न उत्तमतया ज्ञातं, न च सम्पूर्णतः अज्ञातम्। मध्वाचार्यानुयायिनः राघवेन्द्रयतेः मते पुनः विदितं नाम प्रमाणविषयीभूतं व्यक्तं जगत्, अविदितं नाम शशशृङ्गवत् अप्रमितं कल्पितं वस्तुजातम्। एवं स विष्णुः ज्ञाताज्जगतः कल्पितेभ्यश्च वस्तुभ्यः भिन्नः, सर्वोत्तमः इत्यर्थः। आधुनिकविद्वत्सु श्रीअरविन्दस्य मते मनसा अवधार्यमानं ब्रह्म हि विदितं ब्रह्म, विदिताद् अतीतं हि अविदितम्। तथाहि तेनोच्यते– "The known is all that we grasp and possess by our present mentality; it is all that is not the supreme Brahman but only form and phenomenon of it to our sense and mental cognition. The unknown is that which is beyond the known and though unknown is not unknowable if we can enlarge our faculties or attain to others that we do not yet possess."[१६] स्वामिदयानन्दसरस्वतीमते विदितं नाम कार्यम्, अविदितं नाम उपादानकारणम्।[१७] यद्यपि शङ्कराचार्यः विदिताविदितशब्दयोः साक्षात् कार्यमुपादानकारणं चेति अर्थं न लिलेख, तथापि सरस्वतीस्वीकृतः अर्थः वस्तुतस्तु श्रीशङ्कराचार्यस्वीकृते अर्थे एव अन्तर्भवति, शङ्करमते अविदितशब्दाभिधेयया परिणाम्युपादानकारणरूपायाः अविद्यायाः कार्यत्वेन विदिशब्दाभिधेयस्य व्याकृतस्य कार्यरूपस्य प्रपञ्चस्य स्वीकरणात्। डयसन्-महोदयस्तु विदितशब्दस्य ज्ञानार्हम्, अविदितशब्दस्य

---

[१५] "Brahman cannot be an object of perception, because He is partless, attributeless, extremely subtle". See, Sri Swami Sivananda, p. 16.

[१६] Sri Aurobindo, The Upanishads II, Kena and Other Upanishads, p. 44.

[१७] "Ātman is viditād adhi, it is not a kārya, a created thing. Perhaps it is kāraṇa, material cause. He says, aviditāt adhi. Avidita is kāraṇa. It is other than the material cause also." See, Swami Dayananda Saraswati, p. 75.

च अचेतनमित्यर्थं चकार। तथाहि तेनोच्यते– “Different it is from the knowable/ And still, for that reason, is not, unconscious!” इति।[१८] इत्थं विदिताविदितशब्दविषये विदुषां विमतिर्दृश्यते। शङ्कराचार्यः रामानुजानुयायिनः मध्वाचार्यानुयायिनश्च स्वस्वसिद्धान्तानुसारेण पदद्वयस्य अर्थं निगद्य मनःप्राणादीनां प्रेरकं ब्रह्म कीदृशमिति निर्णेतुं महान्तं प्रयासं कृतवन्त इति स्पष्टम्।

सामान्यतः स्वीक्रियते चेत् ज्ञानार्थकाद् विद्-धातोः निष्पन्नस्य विदितशब्दस्य ज्ञातम्, अविदितशब्दस्य च अज्ञातम् इत्यर्थः। पूर्वमन्त्रे मनआदीनां प्रेरकः कः इति प्रश्ने समुत्थापिते तस्य उत्तररूपेण मनआदीनां प्रेरकत्वेन यत् निर्दिश्यते तत् ज्ञातात् वस्तुनः अन्यत्, अज्ञातात् च वस्तुनः अधि उपरि विद्यमानम् अन्यदित्यर्थः। ज्ञाताद् अन्यत् इत्यर्थः तु “न तत्र चक्षुर्गच्छति” इत्यादिना मन्त्रांशेन एव चक्षुर्मनआदीनाम् अगम्यत्वात् प्रदर्शितः। अर्थात् ज्ञानकरणानां चक्षुरादीन्द्रियाणां मनसश्च अविषयत्वात् ब्रह्म विदिताखिलवस्तुभ्यः भिन्नं भवति। ननु ज्ञानकरणानाम् अविषयत्वात् विदितेभ्यः अखिलवस्तुभ्यः भिन्नत्वे ब्रह्मणः अविदितत्वम् अर्थात् अज्ञातत्वमेव सिद्ध्यति इति चेत् तन्निराकरणाय उच्यते– तद्धि ब्रह्म अविदितात् अज्ञातात् ज्ञानाविषयीभूतात् वस्तुजातात् अपि भिन्नम् इत्यर्थः। सम्पूर्णेऽस्मिन् ब्रह्माण्डे सम्भवन्ति हि तादृशानि वस्तुजातानि यानि अस्माकं परिमितबुद्धीनां मनुष्याणाम् मनइन्द्रियादीनाम् अगम्यानि अतिसूक्ष्माणि रहस्यावृतानि च। तान्येवात्र अविदितपदेन ग्रहीतुं शक्यन्ते। अथवा अविदितपदेन मनसा कल्पितं पदार्थजातं ग्रहीतुं शक्यते। अतः ब्रह्म ज्ञानाविषयीभूतात् वस्तुनः कल्पितात् वा पदार्थादपि अधि उपरि अन्यद् वा। अयमर्थस्तु मध्वाचार्यानुयायिना राघवेन्द्रयतिना स्वीकृतः। ब्रह्मणः ज्ञानकरणाविषयत्वेऽपि तत् न अज्ञातम् पूर्णतः अहंप्रत्ययविषयत्वेन चैतन्यरूपेण च अनुभूयमानत्वात्। मनसा बुद्ध्या वा किञ्चित् वस्तु ज्ञातम् अज्ञातं वा भवति। मनसोऽगम्यत्वात् तद् ब्रह्म ज्ञातेभ्यः अज्ञातेभ्यश्च वस्तुभ्यः अन्यत्। वस्तुतो ब्रह्म ज्ञातम् अज्ञातं वा वस्तुमात्रं नास्ति, अपि तु ज्ञाताज्ञातयोः चेतनाचेतनयोश्चापि प्रेरकं प्रकाशकं नियन्त्रकं चैतन्यज्योतिरिति बोधनायैव उपनिषदः एतादृशपरस्परविरुद्धरूपतया काव्यरूपेण उपस्थापनम् इति मे मतम्। शङ्करभगवत्पादैः विदितपदस्य व्यक्तरूपार्थः यः स्वीकृतः

१८ Paul Deussen, Sixty Upaniṣads of the Veda, p. 209.

तस्य याथात्म्येऽपि अव्यक्तपदस्य व्यक्तबीजभूता अविद्यालक्षणा इत्यर्थः यः अङ्गीकृतः स तदीयसिद्धान्तसम्मतः, केनोपनिषद्व्याख्याने अप्रासङ्गिकः अयुक्तश्च, केनोपनिषदि कुत्रापि तस्यानुल्लेखात्, विनापि तत्पदं मन्त्रार्थसम्भवात्। रङ्गरामानुजपादैः अविदितपदस्य सम्पूर्णतः अज्ञातम् इति योऽर्थः स्वीकृतः तत्तु मयोक्तव्याख्यानदृष्ट्या सङ्गच्छते, मयापि अहंप्रत्ययविषयत्वेन ब्रह्मणः ज्ञेयत्वाङ्गीकारात्। किञ्च, राघवेन्द्रयतिसम्मतः ज्ञातेभ्यः कल्पितेभ्यश्च वस्तुभ्यः ब्रह्म भिन्नमित्यर्थोऽपि मयोक्तव्याख्यानदृष्ट्या सङ्गच्छते। श्रीअरविन्दस्य मनसा अवधार्यमाणं ब्रह्म हि विदितं ब्रह्म, विदिताद् भिन्नं हि अविदितम् अज्ञातं ब्रह्म इत्यर्थोऽपि मत्स्वीकृतेऽर्थे अन्तर्भवति। दयानन्दसरस्वत्या तु विदितं नाम कार्यम् अविदितं नाम उपादानकारणमिति योऽर्थः निगदितः सोऽपि केनोपनिषदि अप्रासङ्गिकः कष्टसाध्यश्च। डयसन्-महोदयकृतः अविदितपदस्य अचेतनरूपार्थः मयोक्तव्याख्यानदृष्ट्या सङ्गच्छते, परन्तु व्युत्पत्तिदृष्ट्या विदितशब्दस्य ज्ञानार्हम् [the knowable] इति, अविदितपदस्य च अचेतनम् [unconscious] इत्यर्थः न सङ्गच्छते।

किं बहुना, विदितं ब्रह्म नाम विदिक्रियाकर्मभूतं व्यक्तं सगुणं सविशेषं ब्रह्म ईश्वरनामधेयम्, अविदितं ब्रह्म नाम विदिक्रियायाः अविषयीभूतं निर्गुणं निर्विशेषं तुरीयं ब्रह्म इति स्वीकारेऽपि मन्त्रार्थः सङ्गच्छते। एवं प्रकृते मनआदीनां नियन्त्रकं प्रकाशकं च ब्रह्म नाम सगुणात् सविशेषाद् ब्रह्मणः अन्यत्, निर्गुणात् निर्विशेषात् च ब्रह्मणः उपरि विद्यमानम् इति प्रज्ञावतां सकाशात् ब्रह्मतत्त्वं वयं श्रुतवन्तः। ब्रह्मणः एतादृशस्वरूपत्वादेव शिष्येभ्यः तस्य उपदेशप्रकारः न परिज्ञायते येन ते यथार्थतया ब्रह्मतत्त्वम् अवगच्छेयुः। ननु एतादृशं ब्रह्मतत्त्वं शास्त्रेषु न प्रसिद्धमिति चेन्न, ईशावास्योपनिषद्यपि एतादृशम् ईश्वरतत्त्वं वर्णितमिति श्रीअरविन्दप्रभृतिभिः प्रतिपादितम्। श्रीमद्भगवद्गीतायां क्षराक्षरातीतेन पुरुषोत्तमरूपेणापि एतादृशस्यैव ब्रह्मतत्त्वस्य वर्णनं विद्यते। तथाहि उच्यते -

> यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
> अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥

(श्रीमद्भगवद्गीता १५.१८) इति।

अतः अत्र ब्रह्मत्वेन यत्परमतत्त्वं निर्दिदिक्षितं तद्धि सविशेष-निर्विशेषविलक्षणं ताभ्यां च उपरि विद्यमानं सर्वप्रेरकं सर्वनियन्त्रकं सर्वप्रकाशकं चेति। किञ्च, एतादृशार्थस्वीकारे

केनोपनिषत्प्रतिपादितेन सविशेषनिर्विशेषविलक्षणेन ब्रह्मतत्त्वेन सह श्रीरामकृष्णसमन्वयिदर्शनप्रतिपादितस्य निर्गुणात् सगुणाच्चातिरिक्तस्य अनन्तरूपस्य परमेश्वरस्य साम्यम् अवगम्यते। श्रीरामकृष्णस्य समन्वयिदर्शनानुसारेण परमतत्त्वं हि निर्गुणं सगुणं ताभ्यामपि अतिरिक्तम् अनन्तरूपमित्यर्थः। केनोपनिषद् अपि विदिताद् अन्यत् अविदिताच्च अधि इत्यनेन तादृशमेव परमतत्त्वं बोधयितुमिच्छतीति अवगम्यते।

इत्थं केनोपनिषदः प्रथमखण्डे यद् ब्रह्मतत्त्वं मनःप्राणादीनां प्रेरकत्वेन निर्दिदिक्षितं तद् अनन्तरूपत्वात् न पूर्णतः ज्ञातम्, न च पूर्णतः अज्ञातम्, कैश्चित् रूपैः तु ज्ञातम्। अनन्तरूपत्वादेव परिपूर्णतया तस्य ज्ञानं न कदापि शक्यसम्भवम् इति अत्र द्योतितं भवतीति अलं विस्तरेण।

## परिशीलितग्रन्थसूची -

१. *केनोपनिषत्* (श्रीमच्छङ्कराचार्यकृतपदवाक्यभाष्याभ्यां तथा श्रीरङ्गरामानुजकृत-प्रकाशिकया च समेता); पुण्यपत्तनम् – ओरिएंटल बुक् सप्लाइंग एजन्सी; १९१९।

२. *केनोपनिषत्* (सानुवाद-शाङ्करभाष्योपेता केनोपनिषत्); ब्रह्मचारीमेधाचैतन्यः (सम्पादकः); कलिकाता – उद्बोधन-कार्यालय; १९७६।

३. *उपनिषद्भाष्यम्* (श्रीशङ्करभगवत्पादाचार्यविरचितम्– खण्डः १); श्रीशङ्कराचार्यः; एस्. सुब्रह्मण्यशास्त्री, (सम्पादकः); वाराणसी – दक्षिणामूर्ति मठ प्रकाशन; २०११।

४. *श्रीमदानन्दतीर्थभगवत्पादाचार्यप्रणीतभाष्यभूषिता ईशावास्योपनिषत् तथा तलवकारोपनिषत्* (टीका-टिप्पणी-खण्डार्थसंवलिता); रङ्गनाथकट्टिः(सम्पादकः); बेङ्गलूरु– पूर्णप्रज्ञसंशोधनमन्दिरम्; २०१६।

5. *Kena Upaniṣad*; Anirvan; Gautam Dharmapal (trans.); New Delhi – Akshaya Prakashan; 2012.

6. *The Upanishads II, Kena and Other Upanishads*; Sri Aurobindo; Pondicherry – Sri Aurobindo Ashram; 2006.

7. *The Philosophy of the Upaniṣads*; S.M. Srinivasa Chari; New Delhi – Munshiram Manoharlal Publishers Pvt. Ltd; 2002.

8. *Discourses on Kenopanisad*; Swami Chinmayananda; Mumbai – Central Chinmaya Mission Trust; 2007.

9. *“The Kena Upaniṣad”, The Upanishads A Complete Guide*; Signe Cohen; 2017, pp. 335-342.

10. *Sixty Upanishads of the Veda*; Paul Deussen; Delhi – Motilal

Banarasidass; 1980, pp. 207-13.

11. *The Thirteen Principal Upanishads*; Robert Ernest Hume; London – Oxford University Press; 1921, pp. 335-340.

12. *"The Jāiminīya or Talavakāra Upaniṣad Brāhmaṇa"*; Hanns Oertel; Journal of the American Oriental Society; 1896, 16, pp. 79-260.

13. *The Principal Upaniṣads*; S. Radhakrishnan; London – Georgl Allen & Unwin Ltd; 1913, pp. 579-594.

14. *Kenopaniṣad*; Swami Dayananda Saraswati; Chennai – Arsha Vidya Research and Publication Trust; 2009.

15. *Kenopanishad*; Sri Swami Sivananda; Uttarakhand – The Divine Life Society; 1017.

16. *Kenopanisad*; Swāmī Śarvānanda; Madras – Sri Ramakrishna Math; 2007.

17. *The Early Upaniṣads*; Patrick Olivelle (trans. & ed.); New York – Oxford University Press; 1998.

18. *The Sacred Books of the Hindus* (2nd Ed.); B. D. Basu (ed.); Allahabad – Bhuvaneśwarī Āśrama; 1911.

19. *Principal Upanishads* (Vol. 1); N. S. Anantha Rangacharya (trans. and ed.); Bangalore; 2003.

20. *The Sacred Books of the East* (Vol 1). F. Max Muller (trans.); Delhi – Low Price Publications; 2011, pp. 147-153.

✶ ✶ ✶

# उपसर्गार्थचन्द्रिकानुसारं प्रपूर्वक-सत्तार्थक-भू धातोः प्रयोगविमर्शः

**नित्यानन्दमान्ना***

## १. उपोद्घातः

महर्षिपाणिनिकृताष्टाध्यायां सूत्रं विद्यते भुवादयो धातवः [२]। धातुपाठे भू-आदिशब्दाः धातुसंज्ञकाः भवन्ति। धातुपाठे धातवः तेषाम् अर्थाः निरूपिता विद्यन्ते। उपसर्गयोगेन पुनः धातुनाम् अर्थः भिद्यते। तथाहि—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्॥ इति।

सुप्रसिद्धवैयाकरणैः श्रीचारुदेवशास्त्रिभिः प्रणीतः कश्चन अभूतपूर्वः शोधमूलकग्रन्थः उपसर्गार्थचन्द्रिका इति । अस्मिन् ग्रन्थे उपसर्गयोगेन एकस्यैव धातोः एकेनैवोपसर्गयोगेन बहवः अर्थाः सम्भवन्ति इत्यत्र समग्रसंस्कृतवाङ्मयतः प्रयोगाः दर्शिताः। तेषामर्थाश्च निरूपिताः।

## २. शोधकार्यस्य प्रयोजनम्

उपसर्गयोगेन धातोः अर्थभेदे जाते तस्य धातोः कस्मिन् अर्थगणे पाठः स्यात् इति विषये अयं शोधः। एतेन तेषां सोपसर्गाणां धातूनां कारकाङ्क्षाया निर्णये अपि सौकर्यं स्याद् इति वयं मन्यामहे। तस्मादेव विषयेऽस्मिन् शोधकार्यं चिकीर्ष्यते।

## ३. प्रपूर्वक-भू-सत्तायाम्-धातोः प्रयोगविमर्शः

ग्रन्थकारैः प्रपूर्वक-भू-सत्तायाम्-धातोः ये प्रयोगाः दर्शिताः, उपसृष्टधातूनाम् अर्थगणनिर्णयपूर्वकं ते क्रमशः आलोच्यन्ते।

### ३.१. अभिभवार्थकः-

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम्।
कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो॥ (मनुस्मृतिः ३.२) इति।

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

२ पाणिनीयसूत्रम् १.३.१

तैः अर्थः लिखितः– अभिभवति प्रसहत इत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः अभिभवनम् अर्थगणश्च अभिभवार्थकः इति वक्तुं शक्यते।

### ३.२. इच्छार्थकः

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– एतत् प्रबिभावयिषन्ति चतुर्थस्याह्न उद्यत्यै[३]इति। तैः अर्थः लिखितः– प्रभुत्वमक्षरस्य कर्तुमिच्छन्तीत्याहइति। तेन अत्र उपसृष्टधात्वर्थः इच्छा अर्थगणश्च इच्छार्थकः इति वक्तुं शक्यते।

### ३.३. उत्पत्त्यर्थकः

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति॥ (शतपथब्राह्मणम् ७.९) इति।

तैः अर्थः लिखितः– जज्ञ इत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः प्रादुर्भावः अर्थगणश्च उत्पत्त्यर्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– कच्चिच्च वो मूलफलं प्रभूतम् (प्रचुरम्)।

अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः॥
(कुमारसम्भवम् ५.७७) इति।

तैः अर्थः लिखितः– प्रभवः स्रोतःइति। तेन अत्र उपसृष्टधात्वर्थः स्रोतः अर्थगणश्च उत्पत्त्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥ (गीता ८.१८) इति।

तैः अर्थः लिखितः– प्रादुर्भवन्तीत्यर्थः। वनेपि दोषाः प्रभवन्ति रागिणाम्। उक्तोऽर्थःइति। तेन अत्र उपसृष्टधात्वर्थः प्रादुर्भावः अर्थगणश्च उत्पत्त्यर्थकः इति वक्तुं शक्यते।

### ३.४. ऐश्वर्यार्थकः

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्– शकुन्तला–

---

३ ऐतरेयब्राह्मणम् ५.३

पौरव, रक्ष विनयम् । मदनसन्तप्तापि न खल्वात्मनः प्रभवामि (शा.३)इति। तैः अर्थः लिखितः– नात्मन ईश इत्याहइति। तेन अत्र उपसृष्टधात्वर्थः ऐश्वर्यम् अर्थगणश्च ऐश्वर्यार्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– प्रभवति निजस्य कन्यकाजनस्य महाराजः (मालती.४)इति। तैः अर्थः लिखितः– महाराजस्य कन्यास्वधिकार इति विवक्षतिइति। तेन अत्र उपसृष्टधात्वर्थः ऐश्वर्यम् अर्थगणश्च ऐश्वर्यार्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम्।
महोदधेः पूर इवेन्दुदर्शनात् गुरुः प्रहर्षः प्रबभूव नात्मनि॥

(रघुवंशम् ३.१७) इति।

तैः अर्थः लिखितः– शरीरे न ममावित्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः ऐश्वर्यम् अर्थगणश्च ऐश्वर्यार्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्छितो यथा[४]इति। तैः अर्थः लिखितः– मुदा आत्मनः शरीरे न प्रबभूवेत्यन्वयः। शरीरेऽस्य वशो नाभूदित्यर्थः। प्रहर्षविधेयोऽभूदिति पर्यवसितोऽर्थः। इत्थम्भूतो वाग्विन्यासः प्रचरद्भाषाशैल्याऽत्यन्तं संवदत इति सुधीभिरस्यार्वाचीनत्वमवसेयम्भवतिइति। तेन अत्र उपसृष्टधात्वर्थः ऐश्वर्यम् अर्थगणश्च ऐश्वर्यार्थकः इति वक्तुं शक्यते।

### ३.५. ज्ञानार्थकः

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

कथं न खल्वय भवेत् सुखागतं प्रसक्य युद्धं मम राक्षसैः सह।
कथं च खल्वात्मबलं च तत्वतः प्रभावयेन्मां च रणे दशाननः॥

(रामायणम् ५.३७.३५) इति।

तैः अर्थः लिखितः– अनुभवेद् विजानीयात्, परिचिनुयात्, विचिञ्चादित्यर्थः इति। तेन अत्र उपसृष्टधात्वर्थः अनुभवः अर्थगणश्च ज्ञानार्थकः इति वक्तुं शक्यते।

### ३.६. तर्पणार्थकः

---

[४] श्रीमद्भागवतपुराणम् १.११.६

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– यज्ञो हैभ्यो विहृतो न प्रबभूव[5]इति। तैः अर्थः लिखितः- एषां सहायो न बभूव, नैतांस्तर्पयामासइति। तेन अत्र उपसृष्टधात्वर्थः तर्पणम् अर्थगणश्च तर्पणार्थकः इति वक्तुं शक्यते।

## ३.७. निराकृत्यर्थकः

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्– स यदि राजोपदस्येत्। तमत एव तन्वीरन्नतः प्रभावयेयुः[6]इति। तैः अर्थः लिखितः– निष्क्रमयेयुरित्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः निष्क्रमणम् अर्थगणश्च निराकृत्यर्थकः इति वक्तुं शक्यते।

## ३.८. प्रकाशनार्थकः

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– भुवः प्रभवः[7]इति। तैः अर्थः लिखितः– भवनपूर्वके निःसरणे प्रभवतिर्वर्तत इति पदमञ्जरी। हिमवतो गङ्गा प्रभवति। ततः प्रादुर्भवतीत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः प्रादुर्भावः अर्थगणश्च प्रकाशनार्थकः इति वक्तुं शक्यते।

## ३.९. प्रेरणार्थकः

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्– एवं मनःप्रधानानि इन्द्रियाणि प्रभावयेत्[8]इति। तैः अर्थः लिखितः– मनः प्रधानानामिन्द्रियाणां प्रभवेत्। तानि नियच्छेदित्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः नियोजनम् अर्थगणश्च प्रेरणार्थकः इति वक्तुं शक्यते।

## ३.१०. वृद्ध्यर्थकः

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– पशवो रेवत्यां प्राभवन्[9]इति। तैः अर्थः लिखितः– प्रभूता अतिबहुला अभवन्नित्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः अतिबहुलीभवनम् अर्थगणश्च वृद्ध्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्– प्राभवंस्तस्या

[5] ऐतरेयब्राह्मणम् १.१८
[6] शतपथब्राह्मणम्
[7] पाणिनीयसूत्रम् १.४.३१
[8] रामायणम् २.१०५.२१
[9] तैत्तिरीयब्राह्मणम् १.५.२.५

विवेकगुणाः क्रियाः[10]इति। तैः अर्थः लिखितः– उक्तोऽर्थःइति। तेन अत्र उपसृष्टधात्वर्थः अतिबहुलीभवनम् अर्थगणश्च वृद्ध्यर्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्-

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः॥
(ऋक्संहिता २.१३.४) इति।

तैः अर्थः लिखितः– पृष्ठवाह्यादभ्यधिकमित्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः अभ्यधिकम् अर्थगणश्च वृद्ध्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

तस्मादग्निपराः सर्वे देवता इति शुश्रुम।
ब्रह्मणो हि प्रभूतोऽग्निरग्नेरपि च काञ्चनम्॥
(महाभारते अनुशासनपर्वणि ८५.५१)इति।

तैः अर्थः लिखितः– प्रभूतो जात इत्यनर्थान्तरम्इति। तेन अत्र उपसृष्टधात्वर्थः वृद्धिः अर्थगणश्च वृद्ध्यर्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्-

प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्।
यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः।।
(महाभारते शान्तिपर्वणि १०९.१०)इति।

तैः अर्थः लिखितः– प्रभवो भूतिः समृद्धिःइति। तेन अत्र उपसृष्टधात्वर्थः समृद्धिः अर्थगणश्च वृद्ध्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

अजस्रमुपयोक्तव्यं फलं गोमिषु भारत।
प्रभावयन्ति राष्ट्रं च व्यवहारं कृषिं तथा॥
(महाभारते शान्तिपर्वणि ८३.३८) इति।

तैः अर्थः लिखितः– प्रभावयन्ति सामर्थ्ययुतं कुर्वन्ति, एधयन्तीत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः सामर्थ्यम् अर्थगणश्च वृद्ध्यर्थकः इति वक्तुं शक्यते।

## ३.११. शक्त्यर्थकः

[10] राजतरङ्गिणी ५.३५२

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्-

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं यदि किं अमरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति॥

(भर्तृहरिकृतं शतकम् २.९४)इति।

तैः अर्थः लिखितः– दैवमपि येषां नेष्ट इत्यर्थः। प्रभवति मल्लो मल्लाय। तुल्यबली भवतीत्याहइति। तेन अत्र उपसृष्टधात्वर्थः तुल्यबलीभवनम् अर्थगणश्च शक्त्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

भवत्सम्भावनोत्थाय परितोषाय मूर्छते।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे॥

(कुमारसम्भवम् ६.५९) इति।

इति। तैः अर्थः लिखितः– पर्याप्तानि न भवन्तिइति। तेन अत्र उपसृष्टधात्वर्थः पर्याप्तम् अर्थगणश्च शक्त्यर्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्-

प्राचेतसस्तथा दक्षो दक्षपुत्राश्च सप्त ये।
ततः प्रजानां पतयः प्राभवन्नेकविंशतिः॥

(महाभारते आदिपर्वणि १.३३) इति।

लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते।
लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम्॥ (हितोपदेशः) इति।

ततस्तुमुलसंघाते वर्तमाने युगक्षये।
द्विजातिपूर्वको लोकः क्रमेण प्रभविष्यति॥

(महाभारते वनपर्वणि १९०.८९)इति।

तैः अर्थः लिखितः– प्रभविष्यतीति शक्तिसम्पन्नो भविष्यतीत्याहइति। तेन अत्र उपसृष्टधात्वर्थः सामर्थ्यम् अर्थगणश्च शक्त्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्-

मार्जारो महिषो मेषः काकः कापुरुषस्तथा।
विश्वासात्प्रभवन्त्येते विश्वासस्तत्र नो हितः॥ (हितोपदेशः १.८८) इति।

इति। तैः अर्थः लिखितः– प्रभवः समर्था भवन्तीत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः सामर्थ्यम् अर्थगणश्च शक्त्यर्थकः इति वक्तुं शक्यते।

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्– गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः। जरया पुरुषो जीर्णः किं हि कृत्वा प्रभावयेत्[११]इति। तैः अर्थः लिखितः– शक्तिमान्स्यादित्याहइति। तेन अत्र उपसृष्टधात्वर्थः सामर्थ्यम् अर्थगणश्च शक्त्यर्थकः इति वक्तुं शक्यते।

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्– यथा नदीनां प्रभवः समुद्रः, यथाऽऽहुतीनां प्रभवो हुताशः। (समुद्रः प्रभवः सङ्गमस्थानम्। श्राहुतिभिर्हुताशः प्रभूतो भवति) यथेन्द्रियाणां प्रभवं मनोऽपि (प्रभवं प्रभु) तथा प्रभुर्नो भगवानुपेन्द्रः॥[१२] इति। पुत्र दुर्योधन, अहं तव प्रभावी ननु[१३]इति। तैः अर्थः लिखितः– प्रभावोऽस्यास्ति, प्रभुः। अहं ते प्रभवामीत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः सामर्थ्यम् अर्थगणश्च शक्त्यर्थकः इति वक्तुं शक्यते।

## ३.१२. सत्तार्थकः

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्-

अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि।
प्रभवन्त्योपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः॥
(मालविकाग्निमित्रम्) इति।

तैः अर्थः लिखितः– प्रभवः सत्योपीत्याहइति। तेन अत्र उपसृष्टधात्वर्थः सत्ता अर्थगणश्च सत्तार्थकः इति वक्तुं शक्यते।

## ३.१३. सेवार्थकः

ग्रन्थकारैः प्रपूर्वक-भू सत्तायाम् इति धातोः उदाहरणं प्रदत्तम्– देवेभ्यो वै सुवर्गो लोको न प्राभवत्[१४]।

प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये।
प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे।
अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत ऋषूणाम् ॥

[११] रामायणम् २.१०५.११
[१२] म.व्या. १.५१
[१३] पञ्चरात्रम् १
[१४] तैत्तिरीयसंहिता ६.६.११.२

(ऋक्संहिता १.१२७.१०) इति।

तैः अर्थः लिखितः– प्रबभूतु उपकरोतु, उपयोगं व्रजतुइति। तेन अत्र उपसृष्टधात्वर्थः उपकारः अर्थगणश्च सेवार्थकः इति वक्तुं शक्यते।

**३.१४. स्रवार्थकः**

प्रपूर्वक-भू सत्तायाम् इति धातोः ग्रन्थकारैः उदाहरणं प्रदत्तम्-

सुवर्णपुङ्खाः पूष्णस्ते प्रभवन्तः शरासनात्।
मालेव रुक्मपुङ्खानां वितता व्योम्नि पत्रिणाम्॥

(महाभारते विराटपर्वणि ५८.४१)इति।

तैः अर्थः लिखितः– निःसरन्त इत्यर्थःइति। तेन अत्र उपसृष्टधात्वर्थः निःसरणम् अर्थगणश्च स्रवार्थकः इति वक्तुं शक्यते।

**४. उपसंहारः -**

प्रपूर्वक-भू -सत्तायाम्-धातोः ये अर्थाः उक्ताः ते तावत्– अभिभवनम्, इच्छा, प्रादुर्भावः, स्रोतः, ऐश्वर्यम्, अनुभवः, तर्पणम्, निष्क्रमणम्, नियोजनम्, अतिबहुलीभवनम्, अभ्यधिकम्, वृद्धिः, समृद्धिः, सामर्थ्यम्, तुल्यबलीभवनम्, पर्याप्तम्, सामर्थ्यम्, सत्ता, उपकारः, निःसरणम् इत्यादयः।

उपसर्गार्थचन्द्रिका इत्येनं ग्रन्थमाश्रित्य शोधकार्यं कर्तुं महत्सौभाग्यमवाप्तम्। अभूतपूर्वः उत्तमशोधपूर्णोऽयं ग्रन्थः। प्रकृतशोधकार्यस्य महदवसरः प्राप्तः। कार्यकरणेन स्वयं समृद्धः सञ्जातःइति शिवम्।

**परिशीलितग्रन्थसूची -**

१. *अमरकोषः(सुधाव्याख्यासमेतः)*; अमरसिंहः; पणशीकरः, वासुदेवलक्ष्मणशास्त्री (सम्पादकौ); दिल्ली – चौखम्बा-संस्कृत-प्रतिष्ठान; २०१३।
२. *अष्टाध्यायी*; पाणिनिः; गोपालदत्तः पाण्डेयः (सम्पादकः); वाराणसी– चौखम्बा सुरभारती प्राकाशन; २०१६।
३. *वैयाकरणभूषणसारः* ; कौण्डः भट्टः; चन्द्रिकाप्रसादः द्विवेदी(सम्पादकः); दिल्ली – चौखम्बा संस्कृत प्रतिष्ठान; २०१३।
४. *परमलघुमञ्जुषा*; नागेशः भट्टः; लोकमणि दाहाल (सम्पादकः); वाराणसी – चौखम्बा सुरभारती प्रकाशन; २०१३।
५. *लघुशब्देन्दुशेखरः (प्रथमभागः)*; नागेशः भट्टः; बालशास्त्री (सम्पादकः); वाराणसी – चौखम्बा सुरभारती प्रकाशन; २०१३।
६. *उपसर्गार्थचन्द्रिका*; चारुदेवः शास्त्री; वाराणसी – भारतीय-विद्या-प्रकाशनम्; १९९७।

✶ ✶ ✶

# रघुवंशमहाकाव्ये इन्द्रादिदेवकृतविष्णुस्तुतौ अद्वैतचिन्तनम्

**सुजितपरामानिकः** *

## उपोद्घातः

संस्कृतसाहित्यप्रपञ्चे पञ्चानां काव्यानां महाकाव्यत्वेन परिगणनमस्ति। तेषु पञ्चसु महाकाव्येषु द्वे काव्ये स्तः महाकविकुलगुरुशिरोमणिकालिदासस्य। सः स्वप्रतिभया काव्यद्वयमिदं विरच्य संस्कृतसाहित्यस्य माहात्म्यम् इतोऽपि अवर्धयत, येन कारणेन इदानीमपि संस्कृतसाहित्यस्य उज्ज्वलप्रदीप्तशिखा जाज्वल्यमाना दृश्यते। कविस्तु क्रान्तदर्शी, तस्य कर्म काव्यमित्युच्यते। संस्कृतसाहित्ये तु बहूनि काव्यानि सन्ति, किन्तु सर्वेषां काव्यानां महाकाव्याभिधेयत्वं नास्ति। महाकाव्यमिति अभिधानं श्रुत्वैव तत् काव्यं कियत् उत्कृष्टं, रमणीयम् आनन्ददायकमस्ति, किञ्च रसास्वादकमस्ति तज्ज्ञायते। कालिदासस्य द्वयोः महाकाव्ययोः मध्ये एकं भवति 'रघुवंशम्' अपरञ्च 'कुमारसम्भवम्' इति। महाकाव्यद्वयमिदं कालिदासस्य विशिष्टप्रतिभायाः परिचायकम्। रघुवंशं महाकाव्यं तस्य अनवद्यकीर्तिः। यत्र सूर्यवंशीयानां राज्ञां कीर्तिः, किञ्च मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य उज्ज्वलजीवनचरित्रं, शोर्यं, वीर्यं, त्यागः, प्रशासनदक्षता इत्येतत् सर्वम् अत्र प्रामुख्येन वर्णितमस्ति, यस्य पठनेन पुरुषस्य मनसि नवीनचिन्तनं किञ्च प्रशान्तिश्चाविर्भवति। ग्रन्थोऽयं कविकुलगुरुणा रामायणम् आश्रित्य विरचितः। अतः स्वाभाविकतया ग्रन्थेऽस्मिन् भगवतो रामचन्द्रस्य जीवनगाथा तु भवेदेव। पुलस्त्यगोत्रात् उत्पन्नो राक्षसनृपो रावणः पितामहस्य ब्रह्मणो वरेण अपराजेयः सन् सर्वान् प्रति अत्याचारं कुर्वन्नासीत्। स इन्द्रादिदेवान्नपि तस्य बलेन युद्धे पराजितवान्। पराजये प्राप्ते स्वर्गराज्यात् च्युताः विताडिता देवा रावणस्य विनाशाय वैकुण्ठलोकं विष्णुलोकं जग्मुः। ग्रीष्मकाले अतिसूर्यतापेन सन्तप्ता जना यथा शीतलच्छायासंयुक्तबृक्षच्छायां ऋषन्ति तद्वत् देवा अपि रावणस्यात्याचारेण ततः पराजयं प्राप्य तेषां दुःखं प्रशमयितुं वैकुण्ठलोकं क्षीरसमुद्रं जग्मुः। यथा -

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।
अभिजग्मुर्निदाघार्तश्छायावृक्षमिवाध्वगाः॥ (रघुवंशम् १०.०५) इति।

---

* सहायकाध्यापकः, संस्कृतविभागे, आरामबागस्थिते नेतिजिमहाविद्यालये

तत्र ते दिवौकसः भोगिभोगासनासीनं तत्फणामण्डलोदर्चिर्मणिद्योतितं, लक्ष्मीपादसेवमानं, प्रबुद्धपुण्डरीकाक्षं, बालातपनिभां शुकं, प्रारम्भसुखदर्शनं शारदं दिवसमिव विष्णुं ददृशुः। किञ्च देवाः करुणासागरं सर्वविघ्नोपशान्तकं श्रीपतिं माधवं दृष्ट्वा दीनभावेन सर्वभावेन प्रणिपत्य यथाशास्त्रम् अर्थ्याभिः वाग्भिः तं तुष्टुवुः। तैः इन्द्रादिदेवैः सर्वभावेन, पूर्णशरणगत्या अद्वैतभावनया भगवतः श्रीविष्णोः परापरब्रह्मभावेन याः स्तुतयः कृताः तदिदानीं व्याख्यातुं प्रयत्नो विधीयते।

## सृष्टिस्थितिप्रलयकारणत्वेन स्तुतिः

भगवान् विष्णुर्जगतः सृष्टिस्थितिप्रलयरूपाणां कारणरूपः। यतो हि तत एव जगत उत्पत्तिः, तस्मिन्नेव स्थितिः किञ्च तत्रैव प्रलयः 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व'[२] इति श्रुतेः। एतेषां सर्वेषां स एव परमकारणः। परब्रह्मरूपेण यद्यपि स निर्गुणो निर्विकारस्वरूपस्तथापि सत्त्वादिगुणसंस्पर्शेन स गुणमयः सविकारश्च भवति। मायायां गुणसंस्पर्शेन स जायते इव, स्थीयते इव, लीयते इव च इति दृश्यते। अज्ञानावस्थायां गुणत्त्वात् तस्यापि जन्ममरणञ्च भवति किन्तु यथार्थस्वरूपेण वस्तुतः स अजो नित्यः सत्यस्वरूपो भवति, नास्ति तस्य जननमरणं नास्ति बन्धनं न च मोक्षः। यथाह भगवान् श्रीकृष्णः-

> बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।
> गुणस्य मायामूलत्वात् न मे मोक्षो न बन्धनम्॥
>
> (श्रीमद्भागवतम् ११.११.१) इति।

प्रकृतिं मायामाश्रित्य स परमेश्वरः त्रिगुणेन सर्वं साधयति। तथाह गीतायाम्-

> अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
> प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥ (श्रीमद्भगवद्गीता ४.६) इति।

इदं दृश्यमानं जगत् त्रिगुणात्मकं भवति। त्रिगुणात्मकत्वात् एव जगतो वैचित्र्यं दृश्यते। यथा आकाशात् पतितं तोयं भिन्ने भिन्ने स्थाने पतित्वा भिन्नां भिन्नां स्थितिं प्राप्नोति तथा भगवान् जगत्कारणरूपो विष्णुः स्वरूपत एकमयो भवति चेदपि गुणत्रयसंस्पर्शेन भिन्नं भिन्नं रूपं धरति। तदेवाह कविकुलगुरुः महाकाव्यकारः-

> रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।

---

[२] तैत्तिरीयोपनिषत् ३.१.३

देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥ (रघुवंशम् १०.१७) इति।

यदा तद् ब्रह्म रजोगुणप्रधानं भवति तदा स चतुर्मुखब्रह्मा इत्याख्यायते। एषो ब्रह्मा त्रिगुणमयमिदं जगत् सृजति। सर्वेषां प्राणिनां स्थावरजङ्गमानां स एव स्रष्टा, सर्वेषाम् आदिपिता, प्रजापतिः, पितामह इत्युच्यते। तत चतुर्मुखादेव विश्वब्रह्माण्डस्य सृष्टिर्यदा स सत्त्वगुणप्रधानो भवति तदा स स्थितिस्वरूपो विष्णुरित्याख्यायते। स एव सत्त्वगुणप्रधानो जगतः पालककर्ता। परमेश्वरस्य ब्रह्मणो विष्णुस्वरूपे जगतोऽस्य विश्वब्रह्माण्डस्य स्थितिर्भवति। तत्रैव जगदिदं स्थीयते। किञ्च तमोगुणप्राधान्येन स एव महेश्वरो भवति, यः प्रलयस्वरूपो विनाशस्वरूपो रुद्र इत्याख्यायते। सः सृष्टेः विनाशं साधयति। यदा जीवानां कर्मफलाभावात् सृष्टेः आवश्यकता न भवति तदा सः परमपुरुषः रुद्रात्मना नामरूपात्मकां एतां सृष्टिं नाशयति। एवं देवाः विष्णुं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थित आत्मा स्वरूपं यस्य तस्मै ब्रह्मविष्णुहरस्वरूपाय प्रणमन्ति। तदेव ऊचुः देवाः -

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने॥ (रघुवंशम् १०.१६) इति।

## परस्परविरुद्धधर्मत्वेन स्तुतिः

देवाः स्तवेन भगवतो विष्णोः अमोघस्वरूपस्य माहात्म्यं वर्णयन्ति। यद्यपि कीर्तनेन तस्य माहात्म्यम् अन्तं न याति। भगवान् अनन्तस्वरूपः अतस्तस्य माहात्म्यमपि अनन्तं भवति। ते देवाः विष्णुं स्तुवन्ति यत् हे प्रभो भवान् अमेयस्वरूपः। लोकैरियत्तया भवान् न परिच्छिद्यते, परिच्छिन्नो न भवति। किञ्च स अमितो भवति केनापि परिधिना तस्य परिच्छेदो न भवति। स सर्वव्यापी, सर्वमावृत्य तिष्ठति विभुश्च भवति 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः'[३] 'नारायण एवेदग्ं सर्वम्। यद्भूतं यच्च भव्यम्'[४]। षडैश्वर्येण स पूर्णस्वरूपोऽस्ति किञ्च विभूतिनापि पूर्णोऽस्ति। तस्य सकाशे यत् प्रार्थ्यते तत्सर्वं प्राप्यते अतः स प्रार्थनावह इत्युच्यते। पुरुषैः सर्वं जेतुं शक्यते किन्तु जयशीलो विष्णुः केनापि जेतुं न शक्यते। किन्तु भक्तस्य भक्त्या स जितो भवति। अतः स्तुत्या देवाः कथयन्ति यत् भवान् अजितो जयशीलः। स परब्रह्म सृष्टेः प्राग् केवलं बीजरूपेण कारणात्मना आसीत्, नामरूपाभ्यां व्याकृतं नासीत् तदा स अव्यक्त इत्युच्यते। यदा पुरुषाणां कर्मफलं पक्वावस्थां

[३] नारायणसूक्तम् ५
[४] नारायणोपनिषत् ३

प्राप्नोति तदा तस्य सृष्टेः काम उद्भासते, तस्मिन् समये स स्वम् अव्यक्तात्मानं व्याकरोति। तस्मिन् काले तस्य सर्वम् अव्यक्तस्वरूपं नामरूपाभ्यां व्याकृतं वाग्मनसोर्गोचरं भवति। स यथा अव्यक्तस्वरूपस्तथा व्यक्तस्वरूपोऽपि। एवं तस्य परमेश्वरस्य व्यक्ताव्यक्तस्वरूपमुभयमपि वेदादिशास्त्रे दृश्यते। तदेव स्तुवन्ति देवाः-

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्॥ (रघुवंशम् १०.१८) इति।

एष ईशनशीलो विष्णुः सर्वेषां अन्तरे किञ्च बहिरपि तिष्ठति 'अन्तर्वहिश्च तत्सर्वं व्याप्यो नारायणः स्थितः'[५]। स विष्णुः अन्तरमनुप्रविश्य सर्वं नियमयति, सर्वस्य संयमनं करोति स अन्तर्यामीत्यर्थः। स एषो व्याप्यात्मा विष्णुः हृद्देशे तिष्ठति चेदपि मूढेन, मोहग्रस्थेन तन्न ज्ञायते अविद्यया मलिनग्रस्थत्वात् तेषाम् अपरोक्षगम्यं न भवति जन्मशतकोटैरपि। अतस्तेषाम् अविद्याग्रस्थानां मूढानां सकाशे स दूरस्थो भवति। किन्तु विदुषां विवेकिनां धीराणां सकाशे स अन्तस्थो भवति 'सूक्ष्मत्वादविज्ञेयं दूरस्थं चान्तिके च तत्'[६]। अपि च देवा ब्रुवन्ति यत् हे श्रीपते भवान् कामनारहितोऽकाम आत्मस्थ आत्मरतिश्च भवति आप्तकामत्वात पूर्णत्वात्। आत्मनैव तस्य आत्मा पूर्णोऽस्ति। पूर्णस्वरूपात्मनः पूर्णं स्वीक्रियते चेत् पूर्णमेव स्थीयते। कारणं हि सर्वत्र तु आत्मैवास्ति। परमात्मनो विष्णोः आप्तकामत्वात्स्वात्मना आत्मपूर्णत्वात्कस्मिन्नपि कार्ये तस्य प्रयोजनं नास्ति। तथाहि-

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्यैव च सन्तुष्टस्तस्य कार्यं न विद्यते॥
(श्रीमद्भगवद्गीता ३.१७) इति।

अविद्यामलिनग्रस्थपुरुषो यथा कामनाभावात् सकामो भवति स तु तथा न भवति। यस्तु अपूर्णो मन्यते, सकामस्तस्यैव कामनादिनिमित्तम् अविद्याग्रस्थजन्ममरणसंसारभोगो, वारं वारं योनिषु परिभ्रमणमिति। यद्यपि भगवतः कर्तव्यतया किमपि कार्यं न विद्यते तथापि स लोकसंग्रहाय लोककल्याणाय दुःखपरिहाराय च कार्यं करोति इव दृश्यते। अतः स भगवान् दयालुः, करुणास्वरूपः, करुणासिन्धुरित्युच्यते। यो निष्कामः स कथं तपः कुरुते इति विरोधः। परिहारस्तु ऋषिरूपेण दुस्तरं तपस्तप्यते। पुरुषः कश्चित्

---

५ महानारायणोपनिषत् १०३
६ श्रीमद्भगवद्गीता १३.१५

दुःखग्रस्थं पुरुषं दृष्ट्वा दुःखेन तं प्रति दयालुः भवति। किन्तु अयन्तु यद्यपि दयालुस्तथापि दुःखेन रहितोऽस्ति, अनघस्पृष्टोऽस्ति नित्यानन्दस्वरूपत्वात् । अपि च स नारायण आदिपुरुषः, पुराणोऽस्ति तथापि अजरो निर्विकारत्वात् अक्षरत्वात्। सः सदा वार्धक्यरहितः सन् अजरो नवीनपुरुष इव प्रतिभाति। यद्वस्तु विकारग्रस्थं भवति तस्यैव अस्तीत्यादिषड्भावविकाराः परिलक्ष्यन्ते अस्य तु निर्विकारत्वात् अस्मिन् षड्भावविकाराः प्रतिषिध्यन्ते। एवं परस्परविरुद्धगुणस्वरूपेण इन्द्रादिदेवैः परमात्मनोर्विष्णोः स्तुतिः कृता। तदेव महाकविः कविकुलगुरुः विलिखति यत्-

हृदयस्थमनासन्नमकामं त्वां तपस्विनम्।
दयालुमनघस्पृष्टं पुराणमजरं विदुः॥ (रघुवंशम् १०.२०) इति।

यद्यपि स त्रिकालातीतस्तथापि तस्य सर्वमधिगम्यमस्ति, त्रिकाले यद्यद्भवति तत् सर्वं तेन विज्ञायते किञ्चिदपि तस्य अविज्ञातं नास्ति स सर्वज्ञस्त्रिकालदर्शी। श्रुतौ अपि तत् समाम्नायते– 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः'[७] इति। किन्तु स तु अविज्ञातः, केनचित् न ज्ञायते इत्यर्थः। किन्तु यः पूर्णशरणगत्या सर्वात्मानं तस्मै समर्पयति तेन तु स विज्ञातो भवति– 'यमेवैष वृणुते तेन लभ्यः तस्मैष आत्मा विवृणुते तनूं स्वाम्'[८]। स योनिः कारणरूपः, तस्मादेव सर्वस्य प्रभवः सृष्टिर्विजायते 'अहं हि सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते'[९]। किन्तु तस्य किञ्चिदपि कारणं नास्ति। स तु आत्मन एव भवति अतः स आत्मभूः स्वयम्भूः इत्याख्यायते। स्वयमेव भवतीति स्वयम्भूः 'येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः'[१०]। सर्वस्य कारणत्वात् स सर्वेषां ईशिता, ईशनशीलः, ईश्वरः प्रभुरित्यर्थः। परन्तु स केनापि ईशितो न भवति अतोऽनीश इत्याख्यायते। स तु सर्वात्मना सर्वत्र वर्तते तद्विना किमपि नास्ति किमपि कल्पयितुं न शक्यते। स स्वयमेव वक्ति-

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥

(श्रीमद्भगवद्गीता ७.७) इति स्मृतेः।

७ मुण्डकोपनिषत् १.१.९
८ कठोपनिषत् १.२.२३
९ श्रीमद्भगवद्गीता १०.८
१० ईशोपनिषत् ८, शाङ्करभाष्यम्, पृष्टम् २८

अपि च श्रुतौ अपि– 'ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्'[११]। तदेव देवा अपि स्तुवन्ति अत्र यत्-

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥ (रघुवंशम् १०.२१) इति।

यद्यपि भगवान् निःस्पृहो निश्चेष्टः तथापि लोककल्याणाय दुष्कृतजनान् हन्ति स चेष्टते इत्यर्थः। कालेन संसारबद्धजनानां निद्रा जागृतिश्च भवति न तु कालातीतस्य। भगवान् विष्णुस्तु कालातीतः। अतस्तस्य जागृतिर्निद्रा न भवेत्। किन्तु देवाः स्तुवन्ति यत् हे भगवन् भवान् नित्यप्रबुद्धोऽपि प्रलयकाले योगनिद्रां गच्छति। एतादृशस्य विरुद्धस्वभावयुक्तस्य भगवतो यथार्थवास्तविकता वस्तुस्वरूपं केन ज्ञातुं शक्यते। भगवतो विष्णोः बहवोऽवताराः सञ्जाताः। तेषाम् अवताराणाम् उद्देश्यमपि भिन्नं भिन्नमासीत्। तेषाम् अवताराणां वैशिष्ट्यमत्र देवाः स्तुत्या कथयन्ति यद्भवान् कृष्णादिरूपेण शब्दादिविषयान् भुक्तवान्। किञ्च नरनारायणादिरूपेण दुश्चरं तप आचरितम्। प्रजासंरक्षणाय दैत्यं मर्दितवान्। औदासीन्येन तटस्थेन वर्तितुं च पर्याप्तः समर्थोऽस्ति भगवान् एव। तथा भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयोः आचरणे सोऽन्यः कः समर्थोऽस्ति। परमात्मनः परस्परविरुद्धसंयुक्तस्तुतिः केवलं स्वकल्पनया कालिदासेन न विरचिता। तस्य प्रमाणं श्रुतौ स्मृतौ चाप्युपलभ्यते। तद्यथा- 'अणोरणीयान्महतो महीयान्'[१२], 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्'[१३]। तथा च स्मृतौ अपि-

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥
(श्रीमद्भगवद्गीता १३.१४) इति।

कविकुलगुरुः तथा विरचयति-

शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः।
पर्याप्तोऽसि प्रजा पातुमौदासीन्येन वर्तितुम्॥ (रघुवंशम् १०.२६) इति।

**विभूतिस्वरूपेण स्तुतिः-**

इदानीं देवा भगवन्तं पद्मनाभं विभूतिस्वरूपत्वेन स्तुवन्ति। कारणं हि

[११] ईशोपनिषत् १
[१२] कठोपनिषत् १.२.२०
[१३] कठोपनिषत् १.२.२२

जगति यत् दृश्यते तत्सर्वं तस्य विभूतिस्वरूपं तस्य तेजोंऽशभूतम् -

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥

(श्रीमद्भगवद्गीता १०.४१) इति।

स एव वेदानां सामवेदोऽस्ति, सप्त सामवेदस्वरूपाः रथन्तरबृहद्रथन्तरवामदेववैरूप्यपावमान्यवैराजचान्द्रमसाः इति सप्तविधाः साममन्त्राः प्रसिद्धाः सन्ति। एतैः सप्तभिः साममन्त्रैः भगवत एव स्तुतिः क्रियते। समुद्राः सप्त भवन्ति। सप्तानामर्णवानां जलं सप्तार्णवजलम्। तत्र शेते यः स सप्तार्णवजलेशयो विष्णुरित्यर्थः। सप्तसु समुद्रेषु भगवान् नारायणः शेते, 'लवणक्षीरदध्याज्यसुरेक्षुस्वादुवास्य'[१४] सप्त समुद्रा इति। किञ्च अग्नेरपि सप्त वक्त्राणि प्रसिद्धानि सन्ति यथा-

कराली धूमिनी श्वेता लोहिता नीललोहिता।
सुवर्णा पद्मरागा च सप्त जिह्वा विभावसोः॥

(वाचस्पत्याभिधानम्) इति।

देवाः श्रीपतिं ब्रुवन्ति यत् भवानेव वह्नेः सप्त मुखस्वरूपाः। सप्तार्चिः सप्त मुखास्तस्यैव भवन्ति अग्निमुखा वै देवाः इति श्रुतेः। किञ्च भूर्भुवःस्वरादीनां सप्तानां लोकानाम् आश्रयः आधारः स एव भवति। स सर्वमावृत्य तिष्ठति। अतः सुराः भगवन्तं विष्णुं स्तुवन्ति -

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम्॥ (रघुवंशम् १०.२२) इति।

इदानीं देवाः सप्तनामानन्तरं समष्टिचतुर्णां कारणत्वेन तं नारायण स्तुवन्ति। शास्त्रे चत्वारः पुरुषार्थाः प्रसिद्धाः सन्ति तद्यथा धर्मोऽर्थकाममोक्षाः। एते पुरुषार्थास्तत एव आदिपुरुषात् नारायणात् सम्भूताः। चतुर्युगाः कृतत्रेताद्वापरकलय इति चत्वारो युगाः शास्त्रे उल्लेखिताः। एते चत्वारो युगास्तत एव नारायणात् सम्भूताः। एते कालपरिमापका एतैः चतुर्भिर्युगैः कालस्य परिमापो भवति। अविद्यावस्थायां तु कालस्य परिमापो भवति न तु विद्यायाम्। देवाः कथयन्ति यत् हे प्रभो भवान् कालस्वरूपः किञ्च कालस्याधिष्ठाता 'कालः कलयतामहं'[१५] इत्यादिस्मृतेः। स तु कालेन बद्धो

---

[१४] अभिधानचिन्तामणिः ४.१४१

[१५] श्रीमद्भगवद्गीता १०.३०

न भवति। कालस्तस्य वशेऽस्ति। काले सर्वमिदं जगत् तिष्ठति, तत्रैव लीयते। ब्राह्मणादिः चत्वारो वर्णाः तत एव सम्भूताः 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः'[16] इति स्मृतेः। ब्राह्मणादिवर्णा भगवतो विराड्पुरुषात् सम्भूताः इति वेदेऽपि तत् समाम्नायते-

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ (पुरुषसूक्तम् १२) इति।

देवाः ब्रुवन्ति यत् हे माधव भवान्नेव चतुर्मुखो ब्रह्मा 'नारायणाद् ब्रह्मा जायते'[17]। भगवतः नारायणस्य एव सत्स्वरूपसत्ता सर्वत्र विराजते। तत एव चतुर्मुखात् सर्वेषां सृष्टिः प्रादुर्भूता। विश्वब्रह्माण्डे सर्वेषां सृष्टित्वेन स एव परमकारणस्वरूपः। तस्यैव विभूतिः सर्वत्र सर्वस्वरूपेण दृश्यते। स यथा अनन्तस्वरूपः तस्य तथा विभूतिरप्यनन्ता तत्तु स्वयमेव कथयति-

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥(श्रीमद्भगवद्गीता १०.४१) इति।

योगिनां साधनत्वेन मनः सहायकं भवति। आधिक्येन कुकर्मवशेन मनः स्वभावतया चञ्चलं भवति। भगवान् कल्याणमयः, प्रकाशस्वरूपो वासुदेवः सर्वेषां हृदि तिष्ठति 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति'[18]। हृदि स्थितस्य परमात्मनो ध्यानेन चञ्चलं मनः एकाग्रं भवति। तस्यैव भगवतः पुनः पुनो नामजपेन मनः शान्तं किञ्च एकाग्रं भवति। एवं शान्तग्रस्तेन मनसा क्रमागतसाधनेन पुरुषो मोक्षस्य समीपं गच्छति। यतो हि मनो भगवतो वासुदेवस्य विभूतिस्वरूपं भवति 'इन्द्रियाणां मनश्चास्मि'[19] 'चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत'[20]। एवं क्रमागतो वासुदेवस्य मननाभ्यासेन किञ्च वैराग्येन मनः निगृहीतं भवति 'अभ्यासवैराग्याभ्यां तन्निरोधः'[21]। अतोऽभ्यासनिगृहीतेन मनसा योगिनोः हृदयाश्रितं ज्योतिर्मयम् अद्वैतमयं, नारायणं सततं विचिन्वन्ति। तेन मनसो वृत्तय उद्गच्छन्ति। मनसा शनैः शनैः अद्वैतस्वरूपस्य एकस्य अद्वितीयस्य चिन्तनेन पुरुषोऽद्वैतभावं परमशान्तिञ्च

---

[16] श्रीमद्भगवद्गीता ४.१३
[17] नारायणोपनिषत् २
[18] श्रीमद्भगवद्गीता १८.६१
[19] श्रीमद्भगवद्गीता १०.२२
[20] पुरुषसूक्तम् १३
[21] योगसूत्रम् १.१२

प्राप्नोति। तदेव स्तुवन्ति सुराः -

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये॥ (रघुवंशम् १०.२४) इति।

**अनन्तमाहात्म्यत्वेन स्तुतिः**

इदानीं देवा परमाराध्यस्य भगवतो वासुदेवस्य माहात्म्यम् अन्तं याति तद् ऋचा कथयन्ति यत् हे पद्मनाभ भवतो माहात्म्यं, कृपा, जीवनं, दिव्यचरित्रम् इत्येतत् सर्वं स्तुतिभ्योऽपि व्यतिरिच्यते। उदधेः रत्नानीव, विवस्ततः तेजांसि इव दूरं सीमारहितम् अमितं भवति भगवतो जीवनचरित्रं किञ्च माहात्म्यमिति। अवाङ्गनसोः दूराणि गोचराणि भगवतः चरितानि स्तुतिमपि अतिक्रम्य गच्छन्ति। स्वाभाविकतया भगवतो माहात्म्यं, जीवनचरित्रं, वैभवमित्येतत् सर्वम् अनतिक्रमं तदमितं तस्येयत्ता नास्ति। अतस्तद्वाचा स्तोतुं प्रकाशयितुं वा न शक्यते इत्यर्थः। भगवान् यथा अनन्तस्वरूपस्तस्य जीवनचरित्रं, वैभवं सर्वमपि अनन्तम्। तदेव देवाः ऊचुः

उदधेरिव रत्नानि तेजांसीव विवस्वतः।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते॥ (रघुवंशम् १०.३१) इति।

देवा विष्णोः स्तुत्यादिना महिमानं कीर्तयन्ति, कारणं हि कीर्तिमान् पुरुषः स एव भवति। अतः कीर्तिमतः पुरुषस्य कीर्तनेन शुभं शिवञ्च भवतीति नास्ति तत्र सन्देहस्यावकाशः। भगवतः विष्णोः स्मरणमात्रमेव बाह्याभ्यन्तरतया पुरुषः पावनत्वं लभते "यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" इति। विष्णोः पादात् प्रसूता गङ्गा एतावती यदि पावनमयी भवति तर्हि तस्य नामग्रहणेन कीर्तनेन च पुरुषः पवित्रो भवतीति तत्र किमु वक्तव्यम्। किञ्च पुरुषः विष्णोः स्मरणेन यदि पवित्रो भवति तर्हि तस्य दर्शनस्पर्शनवन्दनपादसेवनैः पुरुषस्य कियत् फलं भवति तदवधारयितुं न शक्यते। पुरुषस्तस्य प्रसादेन तमेव अच्युतं परमसाध्यमोक्षत्वेन प्राप्नोतीति निःसंशयेन वक्तुं शक्यते। कारणं स एव परमब्रह्म सच्चिदानन्दः परमात्मा। तदेव स्तुवन्ति देवाः -

केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥ (रघुवंशम् १०.२९) इति।

विष्लृ व्याप्तौ इति धातोः यद्व्याप्ततया सर्वदा अस्ति स एव विष्णुः इति विष्णुशब्दस्य धात्वर्थः। द्यावापृथिव्यौ, अन्तरिक्षं, सर्वा दिशः तेनैव

परिव्याप्ताः सन्ति 'द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः'[२२]। विश्वब्रह्माण्डे यत्किञ्चित्किमपि नास्ति यत्तेन प्राप्तं नास्ति। तस्य तु आप्तकामस्य सर्वम् आत्मनैव आत्मा पूर्णोऽस्ति। अविद्याग्रस्थस्य पुरुषस्य अपूर्णत्वं सिध्यति न तु विद्याग्रस्थस्य पुरुषस्य। स तु नित्यो नारायण आदिविराड्पुरुषः 'पुरुषाकारत्वात् पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः'[२३]। तस्य तु जन्ममरणं किञ्च किमपि कर्तव्यं कर्म इत्येषां लेशकारणमात्रमपि न विद्यते 'न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन'[२४]। तथापि लोककल्याणाय, लोकानुग्रहाय च तस्य जन्मकर्म भवति। अज्ञानदृष्ट्या कर्तृकारकादिबोधतया यद्यपि तस्य जन्म कर्म चास्ति तथापि पारमार्थिकदृष्ट्या तस्य किमपि कर्तव्यं नास्ति। स तु सर्वदा निर्विकारः, क्रियाकारकादिरहितः पुरुषः। तस्य महिमा आजीवनं कीर्त्यते चेत् तस्य पारं न याति 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[२५] इति श्रुतेः, वाक् तस्य माहात्म्यकीर्तनेन अशक्त्या श्रमेण च निरुद्धा भवति न तु तस्य गुणानामियत्तया। कारणं हि तस्य गुणोऽनन्तोऽस्ति। गुणानाम् आनन्त्यात् तस्य कीर्तनेनापि तदन्तं न गच्छति। तथा लिखति पुष्पदन्ताचार्यः -

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥(शिवमहिम्नस्तोत्रम् ३२) इति।

तदेव स्तुवन्ति सुरा अपि-

महिमानं यदुकीर्त्य तव संह्रियते वचः।
श्रमेण तदशक्त्या वा न गुणानामियत्तया॥ (रघुवंशम् १०.३३) इति।

**परमसाध्यत्वेन स्तुतिः**

शास्त्रम् अनन्तम् किञ्च अनन्तञ्चास्ति मतम्। किन्तु अनन्तशास्त्राणाम्, अनन्तमतानां मूलसारभाग एकमेवाद्वितीयः परब्रह्मस्वरूपो विष्णुरेव गम्योऽस्ति। आगमादिशास्त्रं, वेदादिशास्त्रं नाना पथा रीत्या च पुरुषार्थं प्रतिपादयति चेदपि पुरुषार्थसिद्धेर्भिन्ना भिन्नाः साधनमार्गा अन्ततो गत्या

२२ श्रीमद्भगवद्गीता ११.२०
२३ ईशोपनिषत् १६, शाङ्करभाष्यम्, पृष्टम् ४१।
२४ श्रीमद्भगवद्गीता ०३.२२
२५ तैत्तिरीयोपनिषत् २.४.१

परमात्मनि विष्णौ एव पर्यवस्यन्ति, स्थितिञ्च प्राप्नुवन्ति। कारणं हि आत्मैवास्ति तद्विहाय किमपि नास्ति, ब्रह्मैवास्ति, आत्मैवास्ति इत्यादिश्रुतेः। स आत्मस्वरूपो विष्णुरेव भवति। अतो नाना पथैः रीत्या चात्मा आत्मन्येव पर्यवतिष्ठते। यथा हिमालयात् प्रवहमाना गङ्गा भिन्ना भिन्ना नदी च नाना गत्या भिन्नेन भिन्नेन मार्गेण प्रवहन्ति चेदपि अन्ततो गत्या ताः सर्वाः नद्यः समुद्रं प्रविशन्ति। एवमेव साधवो, मुनयो, विद्वांसो, मुमुक्षवो भिन्नेन भिन्नेन मार्गेण गच्छन्ति चेदपि तेषां सर्वेषां लक्ष्यस्थलं भवति परब्रह्म एकः अद्वितीयो भगवान् नारायणः। ते सर्वे परमात्माख्यं वासुदेवं प्राप्नुवन्ति। यथा च आम्नायते -

यथा नद्यः स्यन्दमानाः समुद्रेऽ
स्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्॥ (मुण्डकोपनिषत् ३.२.८) इति।

देवाः स्तुवन्ति एतेषां सर्वेषां परमं कारणं परमसिद्धिहेतुश्च भवति भगवान् विष्णुः। तदेव कालिदासोऽपि विलिखति -

बहुधाऽप्यागमैर्भिन्ना पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥ (रघुवंशम् १०.२७) इति।

सर्वेषां परमगतिर्भवति भगवान् विष्णुः। येषां चित्तं पूर्णरूपेण सततं भगवति समर्पितमस्ति। येषां पुरुषाणां परमाराध्यदेवो भगवान् वासुदेवो, येषां चित्तं सर्वदा अनन्यतया भगवन्तमेव स्मरति भजति च किञ्च सर्वकर्म भगवति समर्पयति तेषां वीतरागाणां मोक्षाय अभूयः सन्निवृत्तयेऽपुनरावृत्तये भगवान् विष्णुरेव परमगतिः, परमसाधनस्वरूपः। विष्णुं प्राप्य जीवाः सर्वानर्थमूलकां महामायाग्रस्थाविद्यां छिन्दन्ति, जन्ममरणचक्रे पुनो नावर्तन्ते 'त्वमेव विदित्वातिमृत्युमेति। नान्यः पन्था विद्यतेऽयनाय' [२६] इति श्रुतेः 'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' [२७] इत्यादिस्मृतेश्च। अपि च देवाः प्रशंसन्ति यत् भगवतो विष्णोः महिमाद्यैश्वर्यं सीमारहितमस्ति, अपरिच्छेद्यमस्ति ऐश्वर्येण स सदा पूर्णरूपेण विद्यमानोऽस्ति। एवञ्च स परमपुरुषः आप्तवाग्वेदः। अनुमानं क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्यादिकं ताभ्यां साध्यं गम्यं भवन्तं प्रति का कथा प्रत्यक्षमपि भवत्कृतं जगदपरिच्छेद्यम्।

[२६] श्वेताश्वतरोपनिषत् ३.८
[२७] श्रीमद्भगवद्गीता १५.०६

तत्कारणमप्रत्यक्षस्त्वमपरिच्छेद्य इति किमु वक्तव्यमित्यर्थः। तथा हि -

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥ (रघुवंशम् १०.२९) इति।

देवा विष्णोः स्तुत्यादिना महिमानं कीर्तयन्ति, कारणं हि कीर्तिमान् पुरुषः स एव भवति। अतः कीर्तिमतः पुरुषस्य कीर्तनेन शुभं शिवञ्च भवतीति नास्ति तत्र सन्देहस्यावकाशः। भगवतः विष्णोः स्मरणमात्रमेव बाह्याभ्यन्तरतया पुरुषः पावनत्वं लभते "यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" इति। विष्णोः पादात् प्रसूता गङ्गा एतावती यदि पावनमयी भवति तर्हि तस्य नामग्रहणेन कीर्तनेन च पुरुषः पवित्रो भवतीति तत्र किमु वक्तव्यम्। किञ्च पुरुषः विष्णोः स्मरणेन यदि पवित्रो भवति तर्हि तस्य दर्शनस्पर्शनवन्दनपादसेवनैः पुरुषस्य कियत् फलं भवति तदवधारयितुं न शक्यते। पुरुषस्तस्य प्रसादेन तामेव अच्युतं परमसाध्यमोक्षत्वेन प्राप्नोतीति निःसंशयेन वक्तुं शक्यते। कारणं स एव परमब्रह्म सच्चिदानन्दः परमात्मा। तदेव स्तुवन्ति देवाः-

केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥ (रघुवंशम् १०.३०) इति।

एवं परमपुरुषस्य पुरुषोत्तमस्य विष्णोः नाना माहात्म्यकीर्तनेन तस्य दिव्यजीवनचरित्रकीर्तनेन देवाः तं प्रसादयामासुः। स्तुत्या सर्वे प्रसीदन्ति। इन्द्रादिदेवानां विष्णुं प्रति ताः स्तुतयो मन्त्राः केवलं स्तुतिपरका नासन्। अपि च देवानां सर्वाः ऋचः परमपुरुषोत्तमस्य भगवतो विष्णोः सत्यार्थस्य कथनमासीत्। सत्यार्थस्य कथने पुरुषस्य साधनं सिध्यति न तु अनृतभाषणेन। अतः सत्यभूतेन स्तवेन देवाः विष्णुं प्रसादयामासुः। स तु सत्यस्वरूपः, सर्वदा सत्यतत्त्वे प्रतिष्ठितः। तदेवोच्यते श्रीमद्भागवतकारेण -

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥
(श्रीमद्भागवतम् १०.२.२६) इति।

**उपसंहृतिः**

यद्यपि जगति बहु किमप्यस्ति किन्तु सर्वे श्रेष्ठा वरिष्ठा न भवन्ति। तस्मात् सर्वेषां स्तुतिरपि न क्रियते। यः श्रेष्ठो वरिष्ठः सर्वोत्तमस्तस्यैव

स्तुतिः क्रियते तदेव यथोपयुक्तम्। अस्मिन् रघुवंशकाव्ये दृश्यते यत् दुराचारिरावणस्यात्याचारेण पीडिता इन्द्रादिदेवा वैकुण्ठलोके, विष्णुलोके भगवतो विष्णोः सकाशं जग्मुः। कारणं हि भगवान् विष्णुः सर्वश्रेष्ठो वरिष्ठः, पुरुषोत्तमः, कल्याणकर्ता, सर्वस्याः समस्यायाः समाधानकर्ता। अतो देवास्तत्र गत्वा सर्वभावेन तस्य शरणं गतवन्तः। पिडीताः देवाः प्रथमं तत्र गत्वा भगवन्तं विष्णुं प्रणम्य अर्थ्याभिः वाग्भिः तं स्तुतवन्तः। कारणं हि स एव स्तव्यः स्तवप्रियः 'स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः'[२८]। देवाः सर्वभावेन तस्य अमोघोज्ज्वलजीवनचरित्रं माहात्म्यञ्च अतिभक्तिभावेन कीर्तितवन्तो यदासीत् सत्यभूतम्। देवैः विष्णोः या स्तुतिः कृता तत् सर्वं सम्यक्तया परिशील्यते चेत् तासु स्तुतिषु अद्वैतभावः स्फुटतया अवगम्यते। एकस्य अद्वितीयस्य पुरुषस्य स्तुतिः तु अद्वैतमय्येव भवतीति नास्ति तत्र संशयस्यावकाशः। अत्र यथा भगवतो वासुदेवस्य परब्रह्मत्वेन स्तुतिः समुपलभ्यते तद्वत् अपरब्रह्मत्वेनापि। यथा नदीनां बहवो अम्बुवेगाः समुद्रमेवाभिद्रवन्ति, तथैव सर्वासां भावानां मन्त्राणां स्तुतीनां तात्पर्यम् अद्वैतमयं भवति। यद्यपि स परमपुरुषोत्तमोऽज्ञानभावनायां सातिशयः, साकारो भवति तथापि तदेव तस्य यथार्थस्वरूपं न भवति। तत्तु अनृतं, मिथ्याभूतं कल्पितरूपम्। यथार्थस्वरूपत्वेन स तु निरतिशयो, निराकारो, निरञ्जनः, अनन्तो, नित्यो, बुद्धो, निर्विकल्पकः, शान्तः, शिवः एकः, अद्वितीयः, परमानन्दस्वरूपः 'निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति कश्चित्'[२९] इति श्रुतेः।

## परिशीलितग्रन्थसूची

१. *रघुवंशमहाकाव्यम्* (महोपाध्यायमल्लिनाथप्रणीतसंस्कृतसञ्जीविनी संस्कृत सान्वय हरिप्रिया हिन्दीव्याख्योपेतम्); कालिदासः; पणशीकरः, लक्ष्मीप्रपन्नाचार्यः पण्डितः (सम्पादकः); वाराणसी– चौखम्बा कृष्णदास अकादमी; २००७।

२. *श्रीमद्भगवद्गीता* ( शांकरभाष्य हिन्दी-अनुवादसहित); गोरखपुर– गीताप्रेस; वि० सं० २०७०।

३. *ईशादी नौ उपनिषद्* (शाङ्करभाष्यार्थ); गोरखपुर– गीताप्रेस; (वि० सं० २०६५)।

४. *ऋकसूक्तमणिमाला*; प्रो० व्रजविहारी चौबे (सम्पादकः); राजस्थान– कात्यायन वैदिक साहित्य प्रकाशन; २०१०।

---

[२८] विष्णुसहस्रनामस्तोत्रम् ८६

[२९] नारायणोपनिषत् ३

५. *मन्त्रपुष्पम्*; कलकाता– उद्बोधनकार्यालयः; २००५।

६. *कुमारसम्भवं-महाकाव्यम्* (सञ्जीविनी शिशुहितैषिणी व्याख्याद्वयोपेतम्); महाकविः कालिदासः ; रेग्मी श्री पं० शेषराजशास्त्री (सम्पादकः); वाराणसी, चौखम्बा संस्कृत संस्थान; वि० सं० २०४४।

७. *नामहट्ट परिचय*; श्रीमद्गौराङ्गप्रेम स्वामी महाराज (सम्पादकः); नदीया– श्रीमायापुर इसकन् नामहट्ट डाइरेक्टरेट्; २००९।

8. <http //www.harekrsna.de/shiva/Shiva-Mahimna-Stotra.pdf>

✶✶✶

# अध्ययनाध्यापनविषये श्रौतस्मार्तचिन्तनम्

प्रशान्तदे*

## किम् अध्ययनं, कश्च अध्येयः

अधिपूर्वकात् इण् गतौ इति धातोः भावे लुटि अध्ययनमिति पदं निष्पद्यते। अधिपूर्वकः इधातुः ज्ञानार्थे प्रवर्तते। अधीयते ज्ञायतेऽनेन इति अध्ययनम्। अतः प्रश्नः जायते किम् अध्येयम्, अध्ययनेन किं भविष्यति इति। तत्र आधुनिका वयं झटित्येव वदिष्यामः, येन अस्माकम् ऐहिकोन्नतिः सिध्यति, येन च आत्यन्तिकी विभूतिः प्राप्यते तत् ज्ञेयम् इति। एतादृशी जिज्ञासा वैदिकानामपि आसीत्। परन्तु ते केवलम् ऐहिकविभूतिलाभे तुष्टा नासन्। आध्यत्मिकोन्नतिरपि आसीत् तेषां लक्ष्यतमा, सा तु येनोपायेन भवति तदेव ज्ञेयम् इति तेषां मतम्। परन्तु कथं भविष्यति आध्यात्मिकोन्नतिः, कस्य वा ज्ञानात् तल्लक्ष्यं परिपूर्यते इत्यत्र आहुः वैदिकाः– 'धर्मः एव ज्ञातव्यः' इति। ज्ञाते सति धर्मे ऐहिकामुष्मिकफलानां संप्राप्तिः सारल्येन भवति। धर्मो हि नाम आचारविशेषाः, ये तु अस्मान् धारयन्ति। पुनः प्रश्नः जायते कस्तु धर्मप्रतिपादकः, कस्माद् वा धर्मस्य ज्ञानं भवति इति। तत्र वक्तव्यं वेद एव धर्मप्रतिपादकः, वेदेभ्यः एव धर्मज्ञानं जायते। उक्तं च मनुना– 'वेदोऽखिलो धर्ममूलम्' इति। अतः सिध्यति वेदोऽध्येतव्यः इति। श्रुतिः स्वयमेव आह स्वाध्यायोऽध्येतव्यः इति।

परन्तु प्रश्नः जायते वेदः केन प्रकारेण अध्येतव्यः, कथं वा अध्ययनं सार्थकं भवतीति, किं तत् पाठमात्रेण उत अर्थज्ञानद्वारेण। तत्र वक्तव्यं यद्यपि उभयथा एव वेदाध्ययनस्य परिपूर्तिः भवेत् तथापि तत्र वेदार्थज्ञानस्य एव प्राधान्यं विद्यते। गुरोरुच्चारणम् अनुसृत्य वेदोच्चारणाभ्यासात् सस्वरवेदोच्चारणशिक्षा लभ्यते, तेन तु सम्यक्तया मन्त्रोच्चारणं कर्तुं पार्यते। परन्तु वेदवक्तव्यं किं कुत्र वा यज्ञे को वा मन्त्रः प्रयोक्तव्यः इत्येतेषां ज्ञानं वेदार्थज्ञानं विना नैव अधिगच्छति। वेदार्थबोधं विना वेदप्रतिपादितः कर्तव्याकर्तव्यविवेकोऽपि प्रतिष्ठां न लभते। अतः अर्थज्ञानस्यैव प्राधान्यं ख्याप्यते श्रुतौ – ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति।

---

* सहकारी अध्यापकः,महेशतला कलेज-इत्यस्य

## केनोपायेन आयत्तीक्रियते वेदार्थः

वेदार्थज्ञानं तु येन केनापि प्रकारेण भवितुं नार्हति। तत्र साम्प्रदायिकी रीतिरस्ति। ये तु यथारीति गुरुगृहं गत्वा गुरुनिर्देशानुसारं पाठं गृह्णन्ति ते एव शक्नुवन्ति वेदार्थम् अवगन्तुम्। तत्र विषयत्रयम् आवश्यकम्,- श्रद्धा मेधा संयमः च। श्रद्धां विना किमपि कर्म नैव सिध्यति।उक्तं च गीतायां – 'श्रद्धावॉल्लभते ज्ञानम्' इति। शिक्षार्थिनाम् अवश्यमेव गुरोर्वचने श्रद्धा स्थापनीया। अनन्तरं मेधा अपि आवश्यिकी, वेदेषु प्रायः एव मेधाविनः स्तुतिः श्रूयते। अथर्ववेदस्य प्रथमसूक्तं मेधाजनननामकं वर्तते। तत्र ऋषिः आत्ममेधाजननार्थं अभीष्टदेवं स्तौति –

पुनरेहि वाचस्पते देवेन मनसा सह।
वाचस्पते नि रमय मय्येवास्तु मयि श्रुतम्॥ (अथर्ववेदः १.१.१-२) इति।

गृह्यसूत्रेषु अपि मेधाजननकर्मविवरणं लभ्यते।

निगूढं हि वेदतत्त्वम्। कदाचित् मेधाविनः अपि तदवगन्तुं न शक्नुवन्ति।अतः मेधया सह संयमः अपि आवश्यकः। उक्तं च मनुना–

इन्द्रियाणां विचरतां विषयेष्वपहरिषु।
संयमे यत्नमातिष्ठेद् विद्वान् यत्नेन वाजिनाम्॥ (मनुसंहिता २.८८) इति।

संयमो नाम इन्द्रियसंयमः। इन्द्रियसंयमार्थमेव वेदार्थिनः प्रति केचन आचाराः निर्दिष्टाः सन्ति वेदेषु, ये तु वेदार्थिनाम् अवश्यमेव पालनीयाः। वेदो खलु ब्रह्मप्रतिपादकः। यस्तु वेदमधीते स एव ब्रह्मचारी। ब्रह्मचारिणः स्वपाठ्यग्रहणधारणार्थं यान् संयमनियमान् पालयन्ति, ते ब्रह्मचर्यनियमा इति कथ्यन्ते। ब्रह्मचर्यव्रतपालनेन एव वेदोऽधिगम्यते।अतः वेदो ब्रह्मचर्यव्रतं स्तौति –

ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति।
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते॥
ब्रह्चर्येण हि कन्या युवानं विन्दते पतिम्।
अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीषति॥
ब्रह्चर्येण तपसा देवा मृत्युमपाघ्नत।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराडभवत्॥ (अथर्ववेदः ११.१.१७-१९)।

वेदतत्त्वस्य अधिगमार्थं ब्रह्मचर्यव्रतस्य अपरिहार्यतामेव प्रकाशयति

तैत्तिरीयब्राह्मणस्य भारद्वाजीया आख्यायिका। भरद्वाजनाम्ना महर्षिणा तदायुषः भागत्रयं ब्रह्मचर्येण अतिवाहितम्। एकदा जीर्णं शयानं भरद्वाजम् उपगम्य इन्द्रोऽवदत् –'भरद्वाज ! यत्ते चतुर्थमायुर्दद्यात् किमेतेन कुर्याः'[२] इति। महर्षिः प्रत्युत्तरम् अदात्– ब्रह्मचर्यमेवानेन चरेयम्[३] इति। एवम् अन्यत्रापि ब्रह्मचर्यप्रशंसा लभ्यते।

## कस्यास्ति वेदाध्ययनस्य अधिकारित्वम्

कः वेदाध्ययनाधिकारीत्यत्र वक्तव्यम् उपनीतस्यैव केवलं वेदाध्यने अधिकारः अस्ति। उपनयनं संस्कारविशेषः।वेदेषु त्रैवर्णिकानामेव उपनयनं विधीयते - 'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यम्'[४]।

स्त्रीणां शूद्राणां च कृते तु उपनयनं निषिद्धम् अस्ति। महाभारतादीनाम् आख्यनेभ्यः तेषां धर्मज्ञानस्य व्यवस्था क्रियते –

> स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
> इति भारतमाख्यानं मुनिना कृपया कृतम्॥
>
> (श्रीमद्भागवत्पुराणम् १.४.२५) इति।

उप आचार्यसमीपं प्रशिक्षितुं नयनम् उपनयनम्। त्रैवर्णिकेषु ब्राह्मणस्य उपनयनम् अष्टमे वर्षे भवति – 'अष्टमे वर्षे ब्राह्मणम् उपनयेत्'[५] इति।

तत्र ब्राह्मणस्य कृते गर्भाष्टमस्यापि वैकल्पिकविधानं दृश्यते, गर्भाष्टमे वा।[६]

एकादशे क्षत्रियस्य उपनयनं द्वादशे तु भवति वैश्यस्य। अत्र मनुमतं किञ्चिद् भिन्नम्, स तु गर्भतः वर्षगणनं कथयति न तु जन्मतः –

> गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
> गर्भादेकादशे राज्ञो गर्भात् तु द्वादशे विशः॥ (मनुसंहिता २.३६) इति।

षोडषात् परं ब्राह्मणस्य उपनयनकालः अतीतः भवेत्, द्वाविंशात् क्षत्रियस्य,वैश्वस्य तु चतुर्विंशात् परम्। एतत्समयमध्ये येषां तु उपनयनसंस्कारः न भवति ते तु पतितसावित्रिक इति आख्यां लभन्ते। वेदेन तु एतेषाम् अध्यापनं निषिद्धं कृतम्। 'नैनान् उपनयेत् नाध्यापयेन्

---

२ तैत्तिरीयब्राह्मणम् ३.१०.११
३ तैत्तिरीयब्राह्मणम् ३.१०.११
४ आपस्तम्बधर्मसूत्रम् १.१.१.१९
५ आश्वलायनगृह्यसूत्रम् १.१९.१
६ आश्वलायनगृह्यसूत्रम् १.१९.२

न याजयेन्नैभिर्व्यवहरेयुः'[७] इति। प्रतिवेदमध्येतुं द्वादशवर्शमितकालः निर्दिष्टोऽस्ति धर्मसूत्रे – 'द्वादश वर्षाणि वेद ब्रह्मचर्यम्' [८]इति। 'मतान्तरेण वेदार्थग्रहणपर्यन्तमेव ब्रह्मचर्यकालः। ग्रहणान्तं वा'[९] इति।

**ब्रह्मचारिणां पालनीयाः नियमाः**

ब्रह्मचर्यव्रतमाचरद्भिः ब्रह्मचारिभिः केचन नियमाः पाल्यन्ते। ऐतरेयारण्यकं तु ब्रह्मचारिणां कृते संयमविघातकं सर्वविधं विलासं निषेधयति। तद्यथा अध्ययनसमये पिष्ठभागेन कुड्यादीनाम् आश्रयणं ब्रह्मचारिणां कृते निषिद्धम् अस्ति। पठनकाले वस्त्रेण सर्वाङ्गपिधानं निषिद्धम्। ब्रह्मचारी पद्मासनादिकं न कुर्यात्, स्वीयं जानुद्वयं ऊर्द्ध्वं कृत्वा योगपट्टवस्त्राद्याश्रयरहितः सन् ग्रन्थम् अधीयीत। मांसं भुत्तवा शोणितं दृष्ट्वा,उच्छिष्टं स्पृष्ट्वा नेत्रयोः अञ्जनलेपनं कृत्वा च न पठेत्। न नखकृन्तनं कृत्वा अधीयीत, न तु चन्दनादिना शरीरलेपनं कृत्वा, न उष्णोदकेन स्नात्वा, न च पुष्पमाल्यं गले धृत्वा अधीयीत। लेखनेन अध्ययनमपि न कर्तव्यम्। ब्रह्मचारी तु अष्टविधस्त्रीसङ्गरहितो भवेत्। तथा च स्मर्यते-

श्रवणं कीर्तनं केलिः प्रक्षणं गुह्यभाषणं
संकल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च।
एवं मैथुनमष्टाङ्गं वदन्ति ब्रह्मवादिनः
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्॥ इति

अनुष्ठिते सति निषिद्धे प्रायश्चित्तविधानमपि लभ्यते। यथा, ब्रह्मचारिणः कृते स्त्रीसङ्गो निषिद्धोऽस्ति। क्रियते चेत् स्त्रीसङ्गः तद्दोषक्षालनाय गर्दभेज्यानामकः प्रायश्चित्तयागः कर्तव्यः[१०]।

अज्ञानतया मधुपाने प्रायश्चित्तप्रयोजनं नास्ति, स्वेच्छया पीयते चेत् कृच्छ्रः कार्यः, व्रतशेषं च समापयेद्। एवं मांसभोजने सत्यपि प्रायश्चित्तं कार्यम्।गुरुः प्रतिकूलः चेद्,गुरोरानुकूल्ये एव प्रायश्चित्तं भवेत् -

मधुमांसाशने कार्यः कृच्छ्रः शेषव्रतानि च।
प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुद्ध्यति॥
(याज्ञवल्क्यस्मृतिः ३.२८२) इति।

---

७ आश्वलायनगृह्यसूत्रम् १.१९.७
८ आश्वलायनगृह्यसूत्रम् १.२२.३
९ आश्वलायनगृह्यसूत्रम् १.२२.४
१० द्रष्टव्यम्– याज्ञवल्क्यस्मृतिः ३.२८०

एवं बहूनि प्रायश्चित्तविधानानि दृश्यन्ते श्रुतिस्मृतिषु।

**आचार्याणां कृते श्रौतस्मार्तविधिनिषेधाः**

आचारं ग्राहयति इति आचार्यः। आचारो नाम वेदविहितः सदाचारः। यस्तु यथाविधि शिष्याणाम् उपनयनं विधाय तान् वेदादीन् अध्यापयेत् स एव आचार्यः। अत आह मनुः -

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥ (मनुस्मृतिः २.१४०) इति।

ऐतरेयारण्यकस्य पञ्चमे आरण्यके महाव्रतरहस्यमालोचयद्भिः ऋषिभिः अध्यापननियमाः अवर्ण्यन्त। ब्रह्मचारिवर्जाय कस्मैचिदपि महाव्रतरहस्यनिवेदनं तत्र निषिध्यते। अब्रह्मचारिणः गृहं गत्वा धनादीन् गृहीत्वा पाठदानमपि निषिध्यते -

नाब्रह्मचारिणे नासब्रह्मचारिणे नो एवासब्रह्मचारिणे नानाभिप्राप्तायैतं देशम्।[११]

मनुस्तु उपाध्यायान् प्रति धनादीन् स्वीकृत्य अध्यापनं निर्दिशति। उपाध्यायः आचार्याद् भिन्नः। यस्तु वृत्त्यर्थं वेदैकादेशं वेदाङ्गानि वा पाठयति, स उपाध्याय इति कथ्यते। उक्तं च मनुना –

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते॥ (मनुस्मृतिः २.१४१) इति।

अपि चोक्तम्—

धर्मार्थौ यत्र न स्यातां शुश्रुषा वापि तद्विधा।
तत्र विद्या न वक्तव्या, शुभं बीजमिवोषरे॥ (मनुस्मृतिः २.११२) इति।

अतः धनादीन् गृहीत्वा अध्यापनम् उपाध्यायस्य कृते नार्घ्यं, परन्तु धनादिलोभात् कदापि अपात्रेभ्यः विद्यां न दद्यात्। उक्तं तु संहितोपनिषद्ब्राह्मणे- विद्यया सार्धं म्रियेत न विद्यामुषरे वपेत् इति[१२]। ऐतरेयारण्यकं तु पुनः बालवृद्धानाम् अध्यापनं निषेधयति, न वत्से न तृतीये[१३] इति।

आचार्यः तिष्ठन् न तिष्ठतः शिष्यान् पाठयेत्, न व्रजन् व्रजतः, न शयानः शयानान्, न मञ्चकोपरि आसीनः सन् मञ्चस्थान् पाठयेत्। केवलं स्वयं

[११] ऐतरेयारण्यकम् ५.३.३
[१२] संहितोपनिषद्ब्राह्मणम्, तृतीयखण्डः १०
[१३] ऐतरेयारण्यकम् ५.३.३

भूमौ आसीनः भूत्वा भूमिष्ठाय एव ब्रूयात्[१४]। एकस्मिन् पर्याये शिष्याणाम् अध्यापनं पर्यायद्वये वा अध्यापनं विधीयते श्रुतौ। ततोऽधिकपर्यायेषु अध्यापनं न ईप्सितम्। न भूयः सकृद्वदनाद् द्विर्गदनाद्वा द्वयैव[१५] इति।

आचार्यस्तु पाठविषयं स्वयम् उक्त्वा शिष्यानपि वाचयति। उक्तं च आश्वलायनगृह्यसूत्रे– यथाशक्ति वाचयीतः[१६] इति। सति प्रयोजने शिष्यताडनमपि कुर्यात्। रज्वादिना उत्तमाङ्गव्यतिरेकेन ताडनं काम्यम्। उक्तं च याज्ञवल्क्येन – पुत्रं शिष्यं च ताडयेत्[१७] इति।परन्तु अन्याय्यं ताडनं कदापि न इष्टम्। मनुस्तु धर्मकामिनं गुरुं प्रति अहिंसया मधुरवचनेन च अध्यापनं निर्दिशति।–

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥
(मनुस्मृतिः २.१५९) इति।

**अनध्ययनकालः स्वाध्यायाध्यायनं च**

श्रुतौ स्मृतौ च बहवः अनध्ययनकालाः निर्दिष्टाः सन्ति। यथा कुक्कुरशृगालादीनां निःस्वने तथा वीणानिःस्वने तावत्कालः अनध्यायः, अमावस्यादितिथौ द्युर्निशम् अनध्ययनकालः निर्दिष्टः। एवंप्रकारेण सप्तत्रिंशदनध्ययनकालान् आदिशति याज्ञवल्क्यस्मृतिः। न च एतेन स्वाध्यायविधेः नित्यत्वं विहन्यते इति शङ्कनीयम्, यतः अनध्यायकालेषु अपि स्वाध्यायपाठस्य विधानं दृश्यते। उक्तं च मनुना –

वेदोपकरणे चैव स्वाध्याये चैव नित्यके।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि॥ (मनुस्मृतिः २.१०५) इति।

**उपसंहारः**

अन्तिमे तु वेदाध्ययनफलविषये किञ्चित् उक्त्वा विरमामः। शतपथब्राह्मणं वेदाध्ययनफलविषये आह-

यावन्तं ह वै इमां पृथिवीं वृत्तेन पूर्णां ददत्, लोकं जयति त्रिस्ताववन्तं जयति भूयांसं च अक्षय्यं – य एवं विद्वान् अहरहः स्वाध्यायमधीते[१८] इति।

एवं स्मृतिग्रन्थेष्वपि फलकथनं श्रूयते। श्रुतिः सर्वदैव वेदस्नातकेभ्यः

---

[१४] ऐतरेयारण्यकम् ५.३.३
[१५] ऐतरेयारण्यकम् ५.३.३
[१६] आश्वलायनगृह्यसूत्रम् १.२१.६
[१७] याज्ञवल्क्यस्मृतिः १.१५५
[१८] शतपथब्राह्मणम् ११.५.६

उच्चं मानम् अदात्, तदेव वेदाध्यायनस्य साक्षात् फलमिति वक्तुं शक्यते। मनुमते नृपादपि स्नातकः मानार्हः। उक्तं च – राजस्नातकयोश्चैव स्नातको नृपमानभाक्[१९] इति।

वैदिकानाम् एवं मूल्यबोधः आधुनिकविश्वस्य कृते अतीव प्रासङ्गिकः। अधुना प्रायः एव शिक्षाप्रतिष्ठाने विशृङ्खलता परिदृश्यते। कदाचित् तु आचार्यपीडनवार्तापि श्रूयते। विनयाभावः एव तत्र कारणं भवति।मनुस्तु आचार्यं प्रति शिक्षार्थिनः आचरणम् एवं निर्दिशति –

य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ।
स माता स पिता ज्ञेयस्तं न दुह्येत् कदाचन॥ (मनुस्मृतिः २.१४४) इति।

आचार्यः एव पिता, माता अपि आचार्यः, तस्य अवमाननं कदापि न कुर्यात्। अध्ययनविषयकं प्राचीनानाम् एवं चिन्तनम् आधुनिकविश्वस्य कृते अतीव उपयोगि, वैदिकमूल्यबोधशिक्षणेन तु गुरुशिष्ययोः पारस्परिकः सम्बन्धः सुदृढो भवेदिति निश्चयेन वक्तुं शक्यते।

✶✶✶

[१९] मनुस्मृतिः २.१३९

# अर्वाचीनसंस्कृतसाहित्ये आचार्यस्य सीतानाथशास्त्रिणोऽवदानम्

**सोमा प्रामाणिका***

सुप्राचीनवैदिककालादेव प्रवहति संस्कृतकाव्यधारा किन्तु नदीस्रोत इव काव्यस्रोतोऽपि अन्तरा अन्तरा गति-परिवर्तनं करोति। संस्कृतसाहित्यमपि वैदिककालात् परं भिन्नरूपताङ्गतं रामायणमहाभारतपुराणादिषु। अनन्तरं कालिदासात् पूर्वकालीनं साहित्यम् एकरूपं कालिदाससाहित्यम् अन्यविधं कालिदासोत्तरसाहित्यमपि भिन्नचरित्रम्। साम्प्रतिके समये विरचितं संस्कृतसाहित्यमपि भिन्नरूपताङ्गतम्। साम्प्रतिके समये भातरवर्षस्य विविधेषु प्रान्तेषु प्रतिनियतं विविधं साहित्यं रचितं भवति। यदा किमपि साहित्यं नवीनेन वैशिष्टेन संयुक्तं भवति, तदा तदर्वाचीननाम्ना परिचीयते। कालिदासेनोक्तं पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्। एतया उक्त्या कालिदासेनापि आत्मनः तृप्तस्य अर्वाचीनत्वं नवीनत्वं वा प्रतिपादितम्। अर्वाचीनमिति शब्द आपेक्षिकः।

अर्वाचीनसंस्कृतसाहित्यस्य प्रारम्भकालमधिकृत्य मतभेदे विद्यमानेऽपि ऊणविंशशताब्दीतो रचितः काव्यसमूहोऽर्वाचीनसंस्कृतसाहित्यनाम्ना परिचीयते। पराधीनताया ग्लानिः स्वाधीनतालाभस्य उद्दीपना क्रमवर्धमाना राष्ट्रियचेतना प्राचीनभावधारायाः प्रत्यारव्यानप्रवणता पाश्चात्त्यसभ्यताया अनुकरणस्पृहा प्राचीनभावधाराया नवीनं मूल्यायनं बाहुल्येन चर्चितो मानवतावादः स्त्रीस्वाधीनताप्रतिष्ठायाः समुद्योग एवमादीनि अर्वाचीनसंस्कृतसाहित्यस्य वैशिष्टानि।

कविः सीतानाथो मेदिनीपुरमण्डलान्तर्गते रासनग्रामे जन्मालभत। तदीयः पिता स्वर्गतो जयनारायण आचार्यः संस्कृतसाहित्ये सुपण्डित आसीत्। तस्य प्रेरणया आबाल्यात् सीतानाथः संस्कृतसाहित्यं स्वाभिनिवेशमधीतवान्। विद्यालयस्य अन्तिमपरीक्षां समुत्तीर्य सः वर्षषट्कं यावत् पितुः सविधे काव्यव्याकरणदर्शनादिशास्त्राणि सम्यगधीतवान्। १९६१ खीष्टाब्दे सः काव्योपाधौ प्रथमश्रेण्यां प्रथमो भूत्वा स्वर्णपदकं प्राप्तवान्। अनन्तरं सः कलिकातास्थितसंस्कृतमहाविद्यालयं समागत्य

---

* अतिथि-अध्यापिका, भैरवगाङ्गुलीमहाविद्यालयः बेलघरिया,कलिकाता तथा एम्.फिल्. रिसर्च् स्कलार् कलिकाताविश्वविद्यालयः।

स्नातकपरीक्षायां प्रथमश्रेण्यां समुत्तीर्णः। अनन्तरं तेन मेदिनीपुरमण्डलस्थिते वाजकुलमहाविद्यालयेऽध्यापकपदं प्राप्तम्। अनन्तरं १९८१ खीष्टाब्दे कलिकाताविश्वविद्यालये अध्यापकरूपेण तस्य नियुक्तिरभवत्। तदारभ्य २००८ खीष्टब्दं यावत् तेन अस्मिन् विश्वविद्यालये संस्कृतविभागे स्वकृतित्वेन अध्यापना कृता। अन्तिमे तेन गोपीनाथकविराजाध्यापकपदम् अलङ्कृतम्। अवसरग्रहणात् परं गोलपार्कनामके स्थाने रामकृष्णमिशनइन्सिटिउट् अफ् कालचार् इत्याख्ये प्रतिष्ठाने २०१५ खीष्टाब्दं यावत् अतिथ्यध्यापकरूपेण कर्म अकरोत्। विद्यासागरविश्वविद्यालये, वेलुडविद्यामन्दिरे, रामकृष्णमिशनविवेकानन्दविश्वविद्यालये तथा पश्चिमबङ्गीयरष्ट्रियविश्वविद्यालये च अतिथ्यध्यापकरूपेण अनेन कर्म कृतम्। तेन बहुविधानि काव्यानि रचितानि। तानि यथा-भावविलासितम्, शिशुयुवदुर्दैवविलसितम्, का त्वं शुभे, काव्यनिर्झरी,काव्यसञ्चयनम् इत्यादीनि। तेन सम्पादिता ग्रन्थाः यथा– दशरूपकम्, उत्तमरामचरितम्, मुद्राराक्षसम्, विक्रमोर्वशीयम्, कुन्तकस्य काव्यदर्शनम् इति , मौलिक एको गवेषणात्मको ग्रन्थः तस्य प्रकाशितो वर्तते। अप्रकाशितग्रन्थेषु महाकाव्यसंवादसमीक्षा काव्यस्य रूपविमर्शः, किरातार्जुनीयसमीक्षा, शिशुपालवधसमीक्षा इत्यादयो ग्रन्थाः प्रथन्ते। बहुविधाः प्रबन्धाः वङ्गभाषायां, संस्कृतभाषायाम्, आङ्गलभाषायाञ्च तेन विरचिताः। प्रबन्धमालिकाख्ये ग्रन्थे तस्य कतिचन वङ्गभाषया प्रबन्धाः प्रकाशिता वर्तन्ते। निबन्धमञ्जूषाख्ये ग्रन्थे तस्य संस्कृतभाषामया आङ्गलभाषामयाश्च कतिचन प्रबन्धाः प्रकाशिताः वर्तन्ते।

तस्य साहित्यकृतीषु वैदर्भरीतेः प्रधान्यं परिलक्ष्यते। का त्वं शुभे इति काव्ये शृङ्गाररसस्य प्राधान्यं स च क्वचिद् विप्रलम्भरूपः क्वचिच्च सम्भोगरूपः। शिशुयुवदुर्दैवविलसितम् इति सामाजिकगीतिकाव्ये करुणरसस्य प्राधान्यम्। अलङ्काराणां विचारस्तु पश्चाद् दर्शयिष्यते।

तदीयकृतीषु बहुविधा साम्प्रतिकी सामाजिकी अवस्था प्रतिविम्बिता परिलक्ष्यते। तथाहि आधुनिककाश्यपस्य उपदेश इति कवितायां काव्यनिर्झरी इति ग्रन्थे परिलक्ष्यमानायामाधुनिकविवाहितस्त्रीणां विकृतमानसिकता परिलक्ष्यते। तथा हि-

शुश्रूषस्व वरं तथाभिनयतः स्वल्पैरहोभिर्यथा
जामाता भविता त्वदेकशरणः स्वातन्त्र्यहीनश्चिरम्।

कन्ये क्रीडनमेव ते तदनुभोः प्रारभ्यतां कौशलात्
पित्रादेः स्वजनाद् यथा स कृपणो विच्छिन्नमूलो भवेत् ॥

(काव्यनिर्झरी-पृः २८-२९) इति ।

शिशुयुवदुर्दैवविलसितम् इति सामाजिके गीतिकाव्ये साम्प्रतिकानां शिशूनां युवजनानाञ्च दुरवस्था सम्यक् प्रतिविम्बिता। महारुद्रसज्जीभवति ताण्डवे इति काव्यनिर्झरीग्रन्थस्थितायां कवितायां क्षयिष्णुसमाजस्य विविधानि समस्याजर्जरितानि चित्राणि अङ्कितानि विलक्ष्यन्ते। शिशुयुवदुर्दैवविलसितम् इति काव्ये त्रयोदशसंख्यकानि छन्दांसि सावलिलगत्या प्रयुक्तानि विलक्ष्यन्ते। अन्येषां काव्यग्रन्थानां छन्दांसि पश्चाद् दर्शयिष्यामि। बहुत्र संस्कृतछन्दोनियमा लङ्घिता कविना। दिङ्मात्रमुदाहरणं यथा-

दोलयति राधा व्यपगतबाधा
हरिहृतहृदया पुलकितकाया
सहिता हरिणा हरिणनयना
सरसवसन्ते मधुरवनान्ते
कुसुमनिकरपुञ्जे यमुनानिकटनिकुञ्जे
इति पुरातनचित्रमिह समये पतति नयने विचित्रम् ॥

(काव्यनिर्झरी-पृ. ५८) इति ।

कवेरस्य अनुवादकाव्यानि अपि मनोहराणि। शोकगाथा इति नाम्ना एतानि पद्यानि परिचितानि। तत्र अध्यापकस्य हेरम्बनाथस्य, श्यामापदमिश्रस्य, मानवेन्दुमुखोपाध्यायस्य च महाप्रयाणे करुणरसाश्रितानि पद्यानि रचितानि कविना। अन्येषामपि केषाञ्चिद् महाप्रयाणे कविताः विद्यन्ते।

तदीयकाव्यकृतीरधिकृत्य तथा प्रबन्धांश्चाश्रित्य ऋताचट्टोपाध्याय-महाभागया 'सीतानाथ आचार्य कवि ओ प्राबन्धिक' इति बङ्गभाषया ग्रन्थः विरचितः। विश्वभारतीविश्वविद्यालयस्य भूतपूर्वया अध्यापिकया कल्पिका-मुखोपाध्यायमहाभागया बङ्गभाषायां जाह्नवीपत्रिकायां के एइ शुभा? इति नाम्ना एकः प्रबन्धः प्रकाशितो वर्तते।

गौहाटीविश्वविद्यालयस्य अध्यापकचरेण ड.दीपककुमारशर्मणा *'An Apprising Note on the sisuyuvadurdaiva Vilasitam'* इत्याख्यः आङ्गलभाषामयः निबन्धः एकः विरचितः।

कृष्णनाथमहाविद्यालयस्य अध्यापकचरेण श्रीअमलकुमारकाव्यतीर्थेन 'A Journal on Indology and Sanskrit' इति पत्रिकायां

अर्वाचीनसंस्कृतजगति आचार्यसीतानाथस्य प्रेमचिन्तनमिति नाम्ना प्रबन्ध एको विरचितः।

अध्यापकेन प्रमोदभारतीमहाभागेन दृक् दृक् भारती इलाहावाद इति पत्रिकायां *'Bhava Vilasitam A Critical Appreciation'* इति नाम्ना कश्चित् प्रबन्धो विरचितः।

वाँकुडारामानन्दमहाविद्यालयस्य अध्यापिकया ड.चिरश्री-मुखोपाध्यायया वर्धमानविश्वविद्यलयस्य अध्यापिकया सुनीता-वटव्याल-महाभागया सम्पादिते ऋतायणी इति ग्रन्थे काव्यनिर्झरी एका समीक्षा इति प्रबन्धः प्रकाशितः। यादवपुरविश्वविद्यालयस्य संस्कृतविभागीयायाम् अन्वीक्षा इति पत्रिकायां Vol XXV अध्यापिकया विजया-गोस्वामीमहाभागया Book Review (*Kā Tvaṃ Śubhe*) इत्यस्य समीक्षा विहिता। रवीन्द्रभारतीविश्वविद्यालयस्य अध्यापिकया इन्दिरा-च्याटार्जीमहाभागया यादवपुरविश्वविद्यालयस्य संस्कृतविभागीयायाम् अन्वीक्षा (Vol.XXX March 2009) इति पत्रिकायां *Contemporary Society and Poet Sitanath Acharya* इति प्रबन्ध एको विरचितः। नरेन्द्रपुररामकृष्णमिशनावासिकस्य अध्यापकेन डॉ.नारायणदाशमहाभागेन घाटाल-रवीन्द्रशतवार्षिकीमहाविद्यालयस्य प्रज्ञा (First Edition, 14th August 2010) इति पत्रिकायां अनुदितसाहित्ये आचार्यसीतानाथशास्त्रिणो योगदानमिति कश्चित् प्रबन्धो विरचितः। एतादृशं प्रबन्धान्तरमपि विराजते यस्य उल्लेखः पश्चाद् भविष्यति।

अनया समीक्षया एतत् स्पष्टीभूतं भवति यद् आचार्यकविः सीतानाथः पश्चिमबङ्गप्रान्ते नितरां कृतित्वस्य अधिकारीति।

✶✶✶

# भामहाचार्यस्य स्वकीयकृतौ शब्दालङ्कारनिरूपणम्

**सञ्जयभट्टाचार्यः** *

सुप्राचीनकालादेव संस्कृतालङ्कारिकैः साहित्ये अलङ्काराणां गौरवयुक्तमेव स्थानमुद्घोषितम्। संस्कृतसाहित्ये अलङ्कारशब्दो विविधेषु अर्थेषु प्रयुज्यते। सामान्यतः अलङ्कारशब्देन काव्यशोभायाः उपकरणविशेषो बोध्यते। वामनाचार्येणोक्तम्– 'सौन्दर्यमलङ्कारः'[१]। वामनाचार्येणालङ्कार-शब्दस्य व्युत्पत्तिद्वितयं सुनिर्दिष्टम्। तयोरेकस्तावद् भाववचनघञ्-प्रत्ययनिष्पन्नः– "अलङ्कृतिरलङ्कारः" इति। अपरश्च करणवचनघञ्-प्रत्ययनिष्पन्नः– "अलङ्क्रियतेऽनेनेति अलङ्कारः" इति। येनालङ्कृतं भवति सः अलङ्कारः। अलङ्कारो नाम अनुप्रासोपमारूपकाद्यलङ्काराः। द्वयोरलङ्कारशब्दयोः प्रथमः साधारणार्थे द्वितीयश्च शब्दार्थालङ्कारादिपारिभाषिकार्थे प्रयुज्येते।

काव्यतत्त्वं निरूपयिषायाम् अलङ्कारो विशेषेणालोचितः संस्कृतालङ्कारिकैः। तस्माद्धि भामहाचार्येणोक्तम्– 'वक्राभिधेयशब्दोक्तिरिष्टा वाचाम् अलङ्कृतिः'[२] इति। अपि च, काव्यादर्शे दण्डिनोक्तम्– 'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते'[३]। वामनाचार्यस्य नये– 'सौन्दर्यमलङ्कारः'। अपि च, 'काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः'[४] इति। आचार्येण कुन्तकेन ईरितम्– वैदग्ध्यभङ्गिभणितिः[५] इति। अर्थात् अलङ्कारो नाम वक्रोक्तिः। मम्मटाचार्यस्य मते शब्दार्थयोर्ये खलु धर्माः पृथग्भावेनाङ्गरूपेण रसस्य समृद्धिं साधयन्ति हारादिवत् ते हि काव्यालङ्काराः यथा अनुप्रासादयः। प्रसङ्गतः समुल्लेख्यं यत् साहित्यदर्पणकारेणोक्तम्–

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥ इति

(साहित्यदर्पणः १.११) इति ।

अलङ्कारस्य स्वरूपप्रसङ्गे आलङ्कारिकेषु यथा मतानैक्यं विद्यते तथैव

---

* गवेषकः, संस्कृतविभागे, गौडवङ्गविश्वविद्यालयस्य

१ काव्यालङ्कार-सूत्रवृत्तिः (१.१.२)

२ काव्यालङ्कारः (१.३६)

३ काव्यादर्शः (२.१)

४ तत्रैव (३.१.१-२)

५ वक्रोक्तिजीवितम् (१.१०)

अलङ्कारविभाजनप्रसङ्गे। अलङ्कारशास्त्रनिकाये अलङ्कारास्त्रिधा विभक्ताः– शब्दालङ्कारः[६] (यमकादिः), अर्थालङ्कारः[७] (उपमादिः), उभयालङ्कारः (पुनरुक्तवदाभासः) चेति।

अलङ्कारसङ्ख्याप्रसङ्गे आलङ्कारिकेषु ऐकमत्याभावो लक्षणीयः। सङ्क्षेपेण सुवचं यत् अलङ्कारस्य निर्दिष्टा सङ्ख्या निर्णेतुं न शक्या। तस्मात् साहित्यचर्चायाः वैचित्र्यानुसारेण अलङ्कारस्य सङ्ख्या उत्तरोत्तरं वृद्धिं गता। आनन्दवर्धनाचार्येण उदितम्– 'सहस्रशो हि महात्मभिरन्येऽलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च'[८] इति। अपि च, दण्ड्याचार्योऽप्युवाच– 'ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति'[९]।

अलङ्कारप्रस्थानस्य प्रधानः प्रवक्ता भामहाचार्यः। काव्यस्य प्राणरूपेण तेनालङ्कारो निर्दिश्यते। तेनोच्यते– 'न कान्तमपि निर्भूषं विभाति वणिताननम्'[१०] इति। भामहाचार्यः ऊनचत्वारिंशत्संख्यकानामलङ्काराणामुल्लेखपुरःसरं व्याख्यानं विहितवान् तथा च वक्रोक्तिर्हि सर्वालङ्काराणां प्राणभूतेति युक्त्या साधितवान्। तेन अतिशयोक्तेः सर्वालङ्कारजीवितायमानत्वम् उररीकृत्योदितम्–

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥

(काव्यालङ्कारः २.८५) इति।

परवर्तिनि काले वक्रोक्तिरियं पृथगलङ्काररूपेण स्वीकृता।

भामहेन स्वीये काव्यालङ्कारे शब्दालङ्कारद्वयं स्वीकृतम्। एतयोर्द्वयोः शब्दालङ्कारयोः अनुप्रासालङ्कारं विवृण्वता भामहाचार्येणोदितम्– "स्वरूपवर्णविन्यासमनुप्रासं प्रचक्षते"[११] इति। सरूपाणाम् अर्थात् समानरूपवर्णानां विन्यासः स्थापनमनुप्रासः। सरूपाणां वर्णानाम् अर्थात् व्यञ्जनवर्णानां, न तु स्वरवर्णानाम् अनुप्रासघटकत्वमस्ति। आनुरूप्येण प्रकर्षेण स्थापनं विन्यासः अनुप्रासः। मयूखटीकाकृता श्रीविष्णुपदभट्टाचार्यशर्मणा विषयोऽयं प्रपञ्चितः– "अनुप्रासे

---

६ शब्दालङ्कारः शब्दगतपरिवृत्तिं सोढुं नालम्।
७ अर्थालङ्कारः अर्थगतां परिवृत्तिं सोढुं नार्हति।
८ ध्वन्यालोकः, (१.१), वृत्तिः
९ काव्यादर्शः(२.१)
१० काव्यालङ्कारः (१.१३)
११ काव्यालङ्कारः (२.५)

स्वरसारूप्यस्यानपेक्षितत्वात्। विन्यासं स्थापनमनुप्रासं प्रचक्षते आलङ्कारिका इति शेषः। स्वरूपवर्णविन्यासेति च अनुप्रासशब्दस्यैव यौगिकार्थः इति”[१२]।

'किन्तया चिन्तया' इत्युदाहरणे नकार-तकारयोः संयुक्तयोः चतुष्कृत्वः प्रयोगः, अतितान्तेत्यत्र च असंयुक्तस्य तकारस्य द्विर्न्यसनम् इत्यनुप्रासः। अतः अनुप्रासस्य द्वितीयं भेदमुदाहरति– “ग्राम्यानुप्रासम् अन्यत् तु मन्यन्ते सुधियोऽपरे” इति। अन्ये केचन विद्वांसः अनुप्रासस्य ग्राम्यरूपं सामान्यरूपं वा प्रदर्शयन्ति 'ग्राम्यानुप्रासमित्यादि' इति लक्षणेन। स “लोलमालानीलालङ्कुलङ्कुलगलो बलः” इत्युदाहरणे कोमलस्य लङ्कारवर्णस्य असकृत् आवृत्तिवशात् अनुप्रासो भवति। परं विच्छित्तिर्न जायते अनुप्रासस्य ग्राम्यतादोषात्।

अनुप्रासस्य वैशिष्ट्यद्वयं तावत् उपदिश्यते श्रीमता भामहेन– 'नानार्थवत्त्वम् तथा सदृशाक्षरत्वम्'। यद्यपि प्रथमे उदाहरणे वर्णसारूप्यं प्रदर्शितम्, परं स 'लोलमाला...' इत्युदाहरणे अनुप्रासस्तु ग्राम्य एव। अत एव मध्यमां स्थितिं प्रदर्शयता तेन लाटानुप्रासस्य लक्षणं कृतम्। लाटानुप्रासः लाटदेशसमुद्भवः। तत्र उदाहरणं यथा– “दृष्टिं दृष्टिसुखां धेहि चन्द्रश्चन्द्रमुखोदितः” इत्यत्र सदृशाक्षरयोः दृष्टिचन्द्रशब्दयोः नानार्थवत्त्वे लाटानुप्रासः।

तदनन्तरं भामहाचार्येण यमकालङ्कारस्य पञ्च भेदाः सोदाहरणं प्रदर्शिताः। तद्यथा– आदियमकं, मध्यान्तयमकं, पादाभ्यासयमकम्, आवलीयमकम्, समस्तपादयमकञ्चेति। तथा चोक्तम्–

आदिमध्यान्तयमकं पादाभ्यासं तथावली।
समस्तपादयमकमित्येतत् पञ्चधोच्यते॥ (काव्यालङ्कारः २.९) इति।

ततः सप्तभिः श्लोकैः यमकानां भेदान् प्रदर्श्य यमकलक्षणम् अभाणि भामहेन–

तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम्।
वर्णानां यः पुनर्वादो यमकं तन्निगद्यते॥

(तत्रैव २.१७) इति

भिन्नार्थकानां समानश्रुतीनां अर्थात् श्रवणेन्द्रियगृहीतानां स्वरव्यञ्जन-

---

[१२] आचार्यभामहप्रणीते काव्यालङ्कारे मयूखव्याख्या श्रीविष्णुपदशर्मविरचिता, द्वितीयः परिच्छेदः (पृ.५)

समुदायानां या पुनरुक्तिः तद् यमकम् नामालङ्कारः। अत्र श्रुतिशब्देन क्रमोऽप्युपलक्ष्यते अन्यथा अनुप्रासादिभ्यो यमकस्य भेदो न स्यात्। तेष्वपि वर्णानां तुल्यश्रुतित्वसद्भावात्। भिन्नार्थकानां समानश्रुतीनां वर्णसङ्घातानां पुनरुक्तिः यमकं नामालङ्कारो निगद्यते इति विष्णुपदभट्टाचार्यशर्माणः। तदनन्तरं श्लोकद्वयेन यमकस्योत्कर्षापकर्षकौ कथितौ भामहाचार्येण–

प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च।
प्रसादि स्वभिधानञ्च यमकं कृतिनां मतम्॥

(तत्रैव २.१७) इति।

इत्यस्मिन् श्लोके यमकालङ्कारस्य उत्कर्षकप्रयोजकगुणाः प्रदर्शिताः। अपकृष्टयमकानि रामशर्मविरचिते 'अच्युतोत्तराभिधाने' काव्ये भूयसा दृश्यन्ते इत्युक्तं भामहेन। ईदृशानि यमकानि रमणीयत्वभावात् हेयानि।

यद्यपि यमकस्य पञ्च भेदास्तेन प्रदर्शिताः तथापि भरतदण्डिप्रभृतिभिरालङ्कारिकैः पृथक्तया परिगणितानां सन्दष्टकसमुद्गादीनां यमकभेदानां पूर्वोक्तेषु पञ्चसु भेदेषु अन्तर्भावः। 'साधुना साधुना तेन..' इत्यादिश्लोकेन आदियमकं, 'साधुः संसाराद्...' श्लोकेन मध्यान्तयमकं, 'न ते धीर्धीरभोगेषु...' इत्यादिश्लोकेन पादाभ्यासयमकं, तदनन्तरं 'सितासिताक्षी' इत्यादिना आवलीयमकम्, 'अमी नृपा दत्तसमग्रशासनाः...' इत्यादिना शासनशब्दस्य चतुरावर्तनात् समस्तपादयमकं उदाहृतं तेन। समस्तपादयमकस्य वैशिष्ट्यरूपेण पुनस्तेनोक्तम्– 'न केवलं सर्वेष्वेव पादान्तेषु एकदेशस्य आवृत्या यमकं भवति, परम् अनन्तरपादान्तयोः एकान्तरपादान्तयोरपि एकदेशस्यावृत्त्या यमकं भवत्येव। तथा हि कृत्स्नञ्च सर्वपादेषु यदि एकरूपं स्यात्, सोऽपि बन्धः श्लाघनीय एव। यथा भट्टिकाव्ये 'वभौ मरुत्वान् विकृतः समुद्रः' इत्यादिः।

इत्थं भामहाचार्येण शब्दालङ्काररूपेण अनुप्रास-यमकयोः उल्लेखं विधाय युक्त्या व्याख्यानं विहितम्। परवर्तिनि काले अलङ्कारप्रस्थाने शब्दालङ्कारत्वेन अनयोरलङ्कारयोः सर्वातिशायित्वं प्रतिष्ठापितम्। अपि च, अलङ्कारप्रस्थानस्य आचार्यवरेषु भामहस्य नाम उच्चैः संस्थापितमित्यत्र नास्ति संशीतिः।

## परिशीलितग्रन्थसूची

१. *अग्निपुराणम्*; वेदव्यासः; श्रीपञ्चाननतर्करत्नः (सम्पादकः); कलिकाता– नवभारत पावलिशार्स; प्रथमसंस्करणम्, १९९९ (पुनर्मुद्रणम्)।

२. *काव्यमीमांसा*; राजशेखरः; सि डि.दालालः तथा आर.ए.शास्त्री. (सम्पादकः); के.एस.रामस्वामी शास्त्री शिरोमणिः (संशोधकः परिवर्धकः च); बडोदा– ओरियेण्टाल इन्सटिटिउट; तृतीय संस्करणम्; १९३४।
३. *काव्यादर्शः मालिन्यप्रोज्छनीटीकासमेतः* ; दण्डी; प्रेमचन्द्रतर्कवागीशः (टीकाकारः); चिन्मयीचट्टोपाध्याया (सम्पादिका); कलिकाता– पश्चिमबङ्गराज्यपुस्तकपर्षद्; १९९५।
४. *काव्यादर्शः* ; दण्डी; आचार्यः श्रीरामचन्द्रमिश्रः (व्याख्याकारः); वाराणसी– चौखम्बा विद्याभवन; १९९६।
५.*काव्यालङ्कारः* ; भामहः; वटुकनाथशर्मा तथा बलदेव-उपाध्यायः (सम्पादकौ); वाराणसी– चौखम्बासंस्कृतसंस्थानम्; द्वितीयसंस्करणम्; १९८१।
6. *New trends in Sanskrit poetics*; Bishnupada Bhattacharya; Dharwad– Karnataka University; 1st edition; 1987.
7. *History of Sanskrit Poetics*; S.K.De; Kolkata– Firma K L M Pvt. Ltd.; Second Revised Edition; 1988.
8. *Literary Criticism in Ancient India*; Ramaranjan Mukherjee; Kolkata– Sanskrit Pustak Bhandar; 1966.

✶✶✶

# Marriage and Its Death : A Brief lnsight Based on *Smṛti* literature

**Bhaktilata Das***

The world is self-alienation of *Brahman*. World is empirically real and here is the context of creation. The *Jīva* is essentially identical with *Brahman*. The gender of the *Brahman* is neither defined as masculine nor as feminine. Then what is the reason to make genders? *Dharmaśāstra* explains—

*dvidhā kṛtvātmano deham ardhena puruṣo'bhavat.*
*ardhena nārī tasyāṃ sa virājam asṛjat prabhuḥ..*

*manusaṃhitā* I. 32

Humans are rational beings among all creatures. They used their sagacity in proper or improper way by their own choice. Here, the question is all about what to do or not to do? Even the cosmos hold well on eternal rule (*ṛta*). Do's and don'ts (legal, illegal) are relative. On the aspect of social welfare, rules are conducted. From this perspective, kingdom is granted[i]. By the proper relationship (*maithunadharma*[ii]) between man and women makes a healthy, enriched society.

Prajanārthaṃ striyaḥ sṛṣṭāḥ santānārthañca mānavāḥ.
Tasmāt sādhāraṇo dharmaḥ śrutau patnyā sahoditaḥ..

*manusaṃhitā*, IX. 96

Here the words '*dharmaḥ*', '*patnyā*' indicate the *saṃskāra 'vivāha'* (marriage). By marriage or matrimonial way, the promise taken by a man and women (bride, bridegroom) indicates that the purpose of marriage will served together equally. *Maithuna* means sexual attachment. By legal way

---

